साहित्यरत्नकोशे

षष्ठः खण्डः



साहित्य अकादेमी

नव देहली

अभिलेखसंग्रहः

AN ANTHOLOGY OF SANSKRIT INSCRIPTIONS

COMPILED AND EDITED BY

BAHADUR CHAND CHHABRA

Śāstrī, Hindī-Prabhākara, M.A., M.O.L., PH.D. (LUGD.), F.A.S.

Joint Director-General of Archaeology in India

Formerly Government Epigraphist for India



SAHITYA AKADEMI

NEW DELHI

Sāhitya-ratna-kośaḥ: Abhilekha-Saṅgrahaḥ (Treasures of Sanskrit Literature: Vol. VI—An Anthology of Sanskrit Inscriptions). Compiled and edited by Dr Bahadur Chand Chhabra. Sahitya Akademi, 1964.

PUBLISHED BY SAHITYA AKADEMI, RABINDRA BHAVAN, 35 FEROZESHAH ROAD, NEW DELHI, AND PRINTED BY SHRI S. N. GUHA RAY AT SREE SARASWATY PRESS LTD., 32, ACHARYA PRAFULLA CHANDRA ROAD, CALCUTTA-9.

PREFACE

Poetry in Sanskrit inscriptions is a little known thing. It is a little known thing even in well-informed circles. And the mere telling that there actually is such a thing in existence conveys no precise idea as to its nature, quality, extent and variety.

The main purpose of this anthology, therefore, is to demonstrate what a wealth of good Sanskrit poetry lies hidden away in quite an unsuspected corner, i.e. epigraphy. Being within the precincts of archaeology, this wealth has remained almost unknown to those moving in the realm of literature. Its charms have failed to catch the eye of those who take delight in Sanskrit poetry.

The hundreds of old Sanskrit compositions of considerable poetic merit, some of which have been drawn upon for the present compilation, do not find a place in the numerous printed catalogues of Sanskrit works. Meanwhile their number goes on increasing as fresh discoveries are made every now and then.

The inscriptional poetry has yet to receive full justice at the hands of those responsible for writing on history of Sanskrit literature. What little has been done in this direction will be found reviewed in the Introduction.

Apart from knowing the history, lovers of Sanskrit would like to know as to what kind of poetry is to be found in Sanskrit epigraphy. They would like to taste and sample the advertised goods. The taste of the pudding is in the eating. Prompted by this consideration, the compiler of the present anthology once had occasion to deliver a speech on 'Little-

known Sanskrit Poets' under the auspices of the Indian Institute of Culture (subsequently renamed as Indian Institute of World Culture) at Bangalore. Later on he wrote a paper on 'Poetry in Sanskrit Inscriptions', which was published in the monthly journal *The Aryan Path* for September, 1951. Therein he happened to announce his intention of preparing a sizable anthology for the delectation of scholars.

Little did he dream at that time that, four years later, he would receive a call from the Sahitya Akademi (NATIONAL ACADEMY OF LETTERS), New Delhi, established in March, 1954, asking him to compile an anthology of verses of purely literary merit from Sanskrit inscriptions. Needless to say that this goaded him on to accomplish the task. The result is now before the interested public.

The present selection comprises examples of the quality as well as of the variety of the poetry in Sanskrit inscriptions of antiquity, chronologically arranged. They are pieces picked out more or less at random, and are not necessarily the best. It is hoped that they will afford the reader a measure of aesthetic pleasure for which poetry primarily stands.

Makara Saṅkrānti
January 14, 1959 B. CH. CHHABRA
New Delhi

CONTENTS

INTRODUCTION

Kāśala, who must have been a Sanskrit poet of repute in his time, declares:

kurvantu kīrtanaśatāni, raṇāṅgaṇeṣu
mathnantu vairinikaraṁ, dhanam utsṛjantu ı
kālāntare tad akhilaṁ prabalāndhakāra-
nṛtyopamaṁ kavijanair anibadhyamānam ıı

'Let them raise monuments, score victories on the battlefield and give liberally in charity. All these grand deeds are bound to pass away like dance performances staged in the dark, unless glorified and immortalized by poets.'[1]

Little did he dream that his own performance would suffer the same fate by the passage of time. He is not at all known now except to a handful of epigraphists. In the stone inscription in which the above-quoted verse occurs, Kāśala introduces himself as a versatile poet as also a trained warrior, proficient in all sorts of handicrafts, expert in the medical care of elephants, and conversant with the various branches of philosophy, including the doctrine of the Buddha.

In common with Kāśala many a good Sanskrit poet has been forgotten by posterity. There are hundreds of inscriptions known as *praśastis* and *śāsanas* which contain excellent poetry in Sanskrit. But it has remained obscure for centuries until recently. Thanks to archaeological discoveries, literary compositions of considerable poetic merit have been discovered and are being discovered even today. Since they are, in general, mostly handled by the archaeologists and epigraphists and utilized for the purpose of historiography, their contents have not been known to the Sanskrit Pandits. Some of the scholars have tried to draw attention to the existence of inscriptional poetry in Sanskrit, but

[1] Verse 5 of the Koni Stone Inscription, *EI*, XXVII, p. 281

that has not helped much. We may notice some of the contributions that have been made in this direction.

When in 1888 Mr John Faithfull Fleet published his edition of the *Gupta Inscriptions*[2], it attracted notice of the well-known German Indologist, Dr George Bühler. He was impressed by the poetic excellence of the very first inscription of Fleet's volume, namely, Hariṣeṇa's *praśasti* of Samudragupta. This prompted him to write an essay which was published in 1889-90 under the title of *Die indischen Inschriften und des Alter der indischen Kunstpoesie* in the *Sitzungsberichte* of the Vienna Academy. He singled out eighteen of the inscriptions published in the *Gupta Inscriptions* as possessing literary merit. He subjected them to a very thorough analysis and brought out their relative worth. In that same essay, he also considered the famous Junagadh Rock Inscription of Rudradāman and the Nasik Cave Inscription of the nineteenth year of Siri-Puḷumāyi, both of which are famous for their poetic prose. It may be observed that the last-mentioned inscription is in Prakrit but follows the same *kāvya* style as in later *gadya-kāvyas*.

Bühler's original German essay was later translated into English by Prof. V. S. Ghate of Poona, which appeared in 1913 in the *Indian Antiquary*, Vol. XLII, in six instalments. In the course of his minute analysis, Bühler here and there also improved upon certain readings of the inscriptions and upon their interpretation. A very conspicuous instance of his scholarly emendations is the fact that he demolished Fleet's view that the Allahabad Pillar Inscription of Samudragupta is posthumous. Since, however, Bühler's original essay was in the German language and its translation appeared much later, Fleet's wrong interpretation of the passage concerned gained currency and subsequent historians accepted only Fleet's view. Vincent A. Smith[3]

---

[2] *CII*, Vol. III

[3] *Journal of the Royal Asiatic Society*, 1898, pp. 386-7

did notice Bühler's emendation, but that did not help much either. He writes: "Professor Bühler is unquestionably right in making this correction, and I regret that I did not know it when writing recently[4] on the history of the reign and conquests of Samudra Gupta."

This happened more than sixty years ago.

Smith made amends by drawing attention to the said letter, in a footnote on page 246 of his *Early History of India*.[5]

In spite of this, Fleet's view persisted, so much so that as late as 1946 Dr R. C. Majumdar and Dr A. S. Altekar, in their joint publication entitled *The Vākāṭaka-Gupta Age* (Lahore, 1946, p. 137), gave credence to Fleet's view. The present writer has dealt with this point in detail in an article published in the *Indian Historical Quarterly*, Vol. XXIV (1948), pp. 104 ff.

A perusal of Bühler's essay would show that he was mainly concerned with the antiquity of what he calls artificial poetry in Sanskrit. By his thesis he has proved that the so-called court poetry existed as early as the middle of the second century A.D. In drawing comparisons, he has been a bit too harsh on Vatsabhaṭṭi whom he describes as a "versifier perhaps learned but clumsy and little gifted." He makes further remarks about him, which are not very charitable. He says slanderingly that "he was not ashamed of making money by composing a piece of poetry occasionally, even when such a low class of people as the silk-weavers required his services."[6] His calling the silk-weavers of Daśapura as a low class of people is entirely uncalled for in the present context and sounds a little highbrow. It may, in passing, be remarked that the word *pūrvā*

[4] Smith evidently refers here to his essay on Samudragupta in the *JRAS*, 1897, pp. 19-33.

[5] It first appeared in 1904. The footnote is repeated in its subsequent editions. The 4th edition has it on p. 298.

[6] *IA*, XLII, p. 147

used by Vatsabhaṭṭi has not been properly understood by Bühler who agrees with Fleet in translating it by 'the above'.[7] In fact, it has been shown to be a term synonymous with *praśasti*.[8]

As against Vatsabhaṭṭi, Hariṣeṇa is praised to the skies by Bühler. Commenting upon the verse 'in which Samudragupta was ordained by his father to be his successor', he writes: "This verse is one of the best productions the Indians have given us, in the domain of miniature-portraits, which is their forte." It has indeed the excellence pointed out by Bühler. It may, however, be remarked that the text given by Fleet has been accepted by Bühler without any reservation. It is strange that Fleet's reading of the opening and the concluding words, namely, *āryyo hi* and *pāhy-evam-urvvīm-iti*, have not struck Bühler as being against the Sanskrit idiom. An attempt was made[9] by the present writer to restore the correct reading which is now given in this Anthology (p. 2).

While Bühler's treatment has been more from a literary-historian's point of view, there have been other scholars who have viewed the subject more from an aesthetic angle. Dr Franz Kielhorn, an equally well-known German Indologist, while editing the Aihole Inscription of Pulikeśin II, remarks:

"Important as this inscription is as an historical document, to myself it seems almost more interesting from a literary point of view."[10]

After Bühler's exhaustive treatment of some of the inscriptions of poetic merit, there has been a long gap. About the year 1925, Prof. D. B. Diskalkar brought out a booklet, entitled *Selections from Sanskrit Inscriptions*, meant chiefly for the students of Indian universities. It contains texts of fifteen select ins-

---

[7] *IA*, XLII, p. 138

[8] *Sarūpa-Bhāratī* (Dr. Lakshman Sarup Memorial Volume), pp. 14 ff.

[9] See the article on Candragupta's Abdication in the *Indian Culture*, Vol. XIV, pp. 141 ff.

[10] *EI*, VI, p. 3

criptions. He informs us that "the selection of texts has been made more with a view to illustrate passages possessing literary merit than to their historical or religious importance."[11] He had planned to publish a second part of this booklet in which he desired to include notes and translations, but this intended part has not yet seen the light of the day. Lately, he has published a list of 'Sanskrit and Prakrit Poets known from Inscriptions,' which is published in the *Journal of the Oriental Institute*, Baroda, Vol. VII, 1957, pp. 78 ff. This list is misleading inasmuch as it includes names not only of poets but also of writers or scribes of inscriptions without any poetic pretentions. Besides, the list is not comprehensive.

Dr D. C. Sircar has published two articles, one entitled 'Kāvya Style in the Inscriptions of the Successors of the Sātavāhanas' and the other 'Inscriptional Evidence Relating to the Development of Classical Sanskrit'. The first was published in 1937-38 in the *Indian Culture*, Vol. IV, pp. 240 ff. and was later reproduced in his book *The Successors of the Sātavāhanas*, Calcutta, 1939. His second essay was published in the *Indian Historical Quarterly*, Vol. XV, 1939, pp. 38ff. His first article is a sort of supplement to Dr Bühler's dissertation inasmuch as it takes into account the inscriptions of the Vākāṭakas and other successors of the Sātavāhanas in the South, which, according to Dr Sircar, also contain passages of considerable poetic merit. In his second contribution he pushes back the date of Classical Sanskrit literature by another fifty years, relying on the evidence that the celebrated Sanskrit poet Aśvaghoṣa was a contemporary of the Kuṣāṇa King Kaniṣka. What is noteworthy in this essay is that Dr Sircar propounds a startling theory that the *Rāmāyaṇa* and the *Mahābhārata* were originally composed in

[11] *Selections from Sanskrit Inscriptions*, Part I—Text, Introduction, p. 4

Prakrit and that their Sanskrit versions were "prepared at the time of the later Kuṣāṇas and Guptas".[12]

A very recent contribution on the subject was a lecture delivered by Dr Radha Govinda Basak at the Ramakrishna Institute of Culture, Calcutta, in January, 1955, and published in the *Bulletin* of the said Institute, Vol. VII, no. 4, April 1956, pp. 73 ff. This is a very interesting lecture, but adds little to what Bühler has already described, except that some of the early inscriptions found in the east of India have received due notice.

The present writer published an article 'Little known Sanskrit Poets' in the *Indo-Asian Culture*, Vol. X, No. 1, July 1961, pp. 30-42. An article in Hindi 'अभिलेखों में काव्य सौंदर्य' ('Poetic Beauty in Inscriptions') was published by K. D. Bajpai in the *Nāgarī Pracāriṇī Patrikā,* Year 58th, No. 3, V. S. 2010, pp. 247-54.

Apart from the contributions just reviewed, one would have expected a proper treatment by the literary-historians, but unfortunately very little has been done so far in this regard. We are told in Dr S. K. De's book entitled *A History of Sanskrit Literature, Classical Period,* Vol. I, published by the University of Calcutta in 1947, that a full account of the elements of literature in inscriptions was intended to be included in that volume[13], but that intention remains unfulfilled to this day. In the body of the book, however, occasional references are made to some very prominent inscriptional poets, such as Hariṣeṇa and Vatsabhaṭṭi, as also to their compositions and certain outstanding inscriptions like those of Rudradāman and Puḷumāyi.

It may thus be seen that much remains to be done with regard to popularizing the inscriptional poetry. This can be accomplished only by giving ample quotations from the original compositions, as is done in the present Anthology. Critics of Sanskrit poetics will find that the passages collected

[12] *Indian Historical Quarterly,* Vol. XV, p. 45, footnote 10

[13] See Preface, p. xi of *A History of Sanskrit Literature, Classical Period,* Vol. I.

here conform to the rules and conventions of classical poetry. As indicated by Kāśala's verse quoted in the beginning, the topics of *praśastis* and *śāsanas* are usually the heroic deeds and charities of kings, as also the meritorious acts of wealthy people, such as construction of temples and tanks. The flight of imagination on the part of the composers of *praśastis* may be found to compare well with that of the known Sanskrit classical poets. It will also be seen that in many cases the names of the composers are not known, which is a great pity indeed. Sanskrit poets are specially fond of alliteration and *double entendre*, which qualities are very much in evidence in Sanskrit inscriptions as well. Their diction, style, rhythm, excellence and embellishments, all remind of the Sanskrit classical poetry with which Sanskrit scholars are familiar. The figures of speech, such as simile, metaphor, fancy, paranomesia (*śleṣa*), oxymoron (*virodhābhāsa*), and a host of others are found in abundance in Sanskirt inscriptions. They also display a variety of metres characteristic of classical poetry.

The present Anthology contains also some passages in what is known as poetic prose. In fact, it opens with such a one from the famous Junagadh Inscription of Rudradāman. Samples of Sanskrit inscriptional poetry from Greater India are also included in this Anthology.

If one were to cull from Sanskrit inscriptions alone, one could easily produce a handsome anthology of a thousand and one delightful poems. These gems remain scattered and hidden. Their merit is seldom recognized. Rarely indeed does their splendour catch the eye. They are passed by as mere weeds grown over the heaps of raw material—raw material for the construction of a more or less prosaic edifice of history which, until yesterday, meant little more than a controversial narrative of the rise and fall of past empires. The builders of such an edifice, in their anxiety for sound and solid stuff, naturally

brush aside the luxuriant over-growth which, to them, serves no purpose whatsoever. Nay, it often proves a hindrance to their work. Yet, from the point of view of poetry, the finest of the fine arts, this very overgrowth contains pieces of undisputed worth, judged by the standard of the Sanskrit classics. They may be useless as historical evidence but, as a source of pleasure, many of them may be found to compare well with the finest of literary compositions.

Where is the place, one may question in all seriousness, for *belles-lettres* in such matter-of-fact documents as inscriptions chiefly are ? These serve history; and history has no room for poetry. This may hold good elsewhere, but not in India. The Indian genius has all along dragged in poetry where poetry is least expected. No matter what the theme—arithmetic or architecture, law or religion, medicine or metaphysics—avenues of elevated expression, at once instructive and entertaining, are sought. In order to drive home a point, an Indian writer or speaker freely employs fancies and hyperboles, similes and metaphors, and a host of other figures of speech, that hit the mark and radiate joy into the bargain. How intriguing, for instance, is the physician who, in adverting to the beneficial effects of the use of dry nuts of myrobalan, declares:

yasya mātā gṛhe nāsti tasya mātā harītakī ।
kadācit kupyate mātā nodarasthā harītakī ॥

'To one who has no mother at home, *harītaki* is mother. Mother may on occasion get angry, but never does *harītakī* in the stomach flare up.'

Let us have another example. We have in the *Bible:* "In all thy ways acknowledge Him, and He shall make straight thy path." (*Proverbs*, III. 6) This simple and direct advice has been rendered in ornate fashion, independently of course, by an ancient theologian, as follows:

yadā carmavad ākāśaṁ veṣṭayiṣyanti mānavāḥ ।
tadā devam avijñāya duḥkhasyānto bhaviṣyati ॥

'When people are able to roll up the sky like a parchment, then will it be possible to get rid of misery without acknowledging God!'

This indirect and suggestive way of putting a thing is characteristic of Sanskrit rhetoricians. It is supposed to add elegance to emphasis.

When poetry can thrive well in the realms to which it is exotic, so to say, how much more luxuriantly could it not flourish in the fields in which it is more or less indigenous? And Indian epigraphy has surely been one such field. It provided ample scope for *belles-lettres*. In invoking the blessings of his favourite deity, in extolling his patron's ancestry, in recounting the exploits of his hero, in describing a temple built by his master, or in a like situation, a writer with a poetic bent would find sufficient excuse for loosening the reins of his imagination.

The authors of *praśastis* on stone and of *śāsanas* on copper were thus not mere recorders of facts. They claimed to be poets, men of aesthetic taste and of varied experience. And mostly such claims are justifiable. The compositions of such persons deserve to be appraised as poems *cum* records, and not as merer ecords.

Before we proceed, one point may be elucidated. Dr Bühler dubbed the poetry in question 'artificial', by which he obviously meant 'conventional', having an eye especially on the high-sounding praises showered on petty chiefs. It is true that such eulogies by court poets sound hollow, but that should not be held to detract from their intrinsic value as poetic compositions. In order to enjoy them, the reader has to keep circumstances and personalities in the background. The crowned heads are used as mere pegs on which to hang the strings of poetic pearls. Viewed in this light, the verses will no longer read as mere servile flattery. Besides, there are certain conventions that are inseparably bound up with all Oriental poetry; to a European, these do look like touches of artificiality.

Savants like Dr Franz Kielhorn, when dealing with inscriptions, do take notice of poetic merits wherever they find any.

Sanskrit poets are specially fond of alliteration and *double entendre*, which qualities are very much in evidence in the parts of Sanskrit inscriptions that are designed to be poetic, both in prose and in verse. They possess in abundance, too, such essentials of good poetry, as diction and style, rhythm and harmony, excellences and embellishments, all of which combine to produce *rasa* or enjoyment, the *raison d'etre* of poetry. A few illustrations may demonstrate this.

The simile is supposed to be the quintessence of felicitous phraseology. From this practically all other figures of speech have sprung. A classical example may be found in—

śrī-Chandraguptasya Mahendrakalpaḥ
Kumāraguptas-tanayaḥ samagrām ।
rarakṣa sādhvīm-iva dharmapatnīṁ
vīryāgrahastair-upaguhya bhūmim ॥

'Kumāragupta—like unto Mahendra (the great god Indra)—son of the illustrious Candragupta, by dint of his valour, protected the whole world even as a husband does his wedded wife, chaste and virtuous, clasping her in his mighty arms.'[14]

The tenderness that goes with the protection, as well as the solicitude underlying it, is subtly hinted at by the earth being likened to a good wife, with Kumāragupta as her lord.

When a copy happens to outshine the model, it is called *Vyatireka* or Transcendence. It may be difficult to find a more apt instance of this than—

apūrvam-induṁ pravidhāya vedhāḥ
sadāsphuratkānti kalaṅkamuktam ।
sampūrṇabimbaṁ vadanaṁ yadīyam
abhūttarāṁ kaṇṭakitāṅgayaṣṭiḥ ॥

[14] *EI*, XXVI, p. 117

'Having created in her face a moon such as was never seen before—a moon of ever sparkling splendour, flawless and full-orbed—the Creator went into raptures even more.'[15]

Mark the significance of 'even more' in the verse. It lends itself to an inference which is a whole story in itself. The Creator must have gone into raptures over the moon, that paragon of beauty of His own creation, despite her obvious blemishes, such as being bright only by night, having a dark spot in the centre, appearing now a full orb and then reduced to a mere slice. Naturally, therefore, He was much more thrilled when He turned out a second moon, free from all those blemishes, in the comely face of Somaprabhā, a belle of the Himālayas, the youthful bride of Prince Sātyaki. That is how, at least, the anonymous poet of the Sarāhaṇ *praśasti* fancies the lady in his description.

A near neighbour of *Vyatireka* is another embellishment, wherein the copy and the model interchange places. It is named *Upameyopamā* or Reciprocity. A typical instance of this is provided by Ravikīrti in his graphic description of the Arabian Sea, swarming with the Cālukyan fleet. The description concludes with—

jalanidhir-iva vyoma vyomnas-samo-'bhavad-ambudhiḥ ||

'The sky was like the sea and the sea resembled the sky.'[16]

This line, it may be observed, is an echo of Vālmīki's—

sāgaraṁ c-āmbaraprakhyam-ambaraṁ sāgaropamam |

'The ocean appeared as the sky and the sky looked like the ocean.'[17]

Vālmīki, India's primeval poet, has been a source of inspiration to the succeeding generations of poets

[15] J. Ph. Vogel, *Antiquities of Chamba State*, p. 156, verse 5
[16] *EI*, VI, p. 6, verse 21
[17] Vālmīki's *Rāmāyaṇa*, VI, v, 120

in this country. And echoes of his epic poem are found in inscriptions as well as in literature. The comparison of clear water to a pure heart or to a serene mind, for instance, originated with him:

ramaṇīyaṁ prasannāmbu sanmanuṣyamano yathā ।

'[The river bank] pleasant, with water as clear as the mind of good people.'[18]

It is this very 'old wine in new bottles' that Ballāla elaborately puts into Vikramārka's mouth:

svacchaṁ sajjanacittavat.....
............pānīyam-ānīyatām ॥

'Fetch some water as pure as the heart of good people....'[19]

The elaboration effected by Ballāla consists of some additional attributes of the water, as sweet as this, as cool as that, scented with this and that, and so forth.

The same idea of Vālmīki has been exploited by various writers of *praśastis* in connection with a well, a tank or the like, the construction of which happens to be the theme of a particular inscription. The Mandasor inscription of Mālava Saṁvat 524 (A.D. 467), for instance, records the construction of a Buddhist *stūpa*, a monastery, a well and a water-stall by a military commander named Dattabhaṭa. Ravila, the author, describes the water of the well as follows:

yasmin suhṛtsaṅgamaśītalaṁ ca
mano munīnām-iva nirmalaṁ ca ।
vaco gurūṇām-iva c-āmbu pathyaṁ
pepīyamānaḥ sukham-eti lokaḥ ॥

'People derive comfort by frequently drinking its water, cool (refreshing) as the meeting of friends,[20]

[18] Vālmīki's *Rāmāyaṇa*, , I, ii, 5
[19] Ballāla's *Bhojaprabandha*, verse 229
[20] In the cold Occident one talks of a warm reception, but in the hot Orient we have a cool meeting !

pure as the mind of sages and wholesome as the words of elders.'[21]

Kāśala, whom we have already quoted, some 700 years later than Ravila, is more specific in his portrayal of the tank built by a pious, learned and large-hearted Brāhmaṇa philanthropist, Puruṣottama by name. He sees in that tank an embodiment of the good heart of Puruṣottama himself. By inserting words of *double entendre*, he has succeeded in heightening the artistic effect:

gambhīraṁ bahusattvaṁ
nirmalam-atiśobhanaṁ janaiḥ sevyam ।
hṛdayam-iva svakam-akarod
Ratnapure sāgaraṁ yaś-ca ॥

'And at Ratnapura he constructed a large tank which is deep, is full of aquatic creatures, is clear, is exceedingly beautiful, is worthy of being resorted to by people, and is thus, in every respect, a replica of his own heart, which likewise is profound, very courageous, pure, extremely fine and approachable by one and all.'[22]

As already remarked, Sanskrit poets have a great liking for *double entendre*. And, as in other languages, so in Sanskrit too, words having double meanings have been found very handy for various kinds of puns. One of very frequent occurrence is *Virodhābhāsa* or Contradiction. It often revolves on a single word which is construed in two different ways, one evolving a contradiction and the other resolving it, so to say. The following example may make the point clear:

saty-api ratnābharaṇe
jānāno-'pi prasādhanaviśeṣam ।
yo vahati bhujena sadā
kuvalayam-āścaryakaṁ loke ॥

'Though possessing plenty of bejewelled orna-

[21] *EI*, XXVII, p. 16, verse 12
[22] *Ibid*., p. 283, verse 31

ments and knowing full well how and where to wear a particular ornament, why, one wonders, is he always wearing a blue lotus on his arm ?'[23]

The person spoken of is the Rāṣṭrakūṭa king, Kṛṣṇarāja III. The inferential contradiction is that his wearing of a blue lotus on his arm does not assort well with his wealth and his expert knowledge. As a king, he can well afford a gold armlet, bedecked with gems; that would be a proper ornament for him, not a blue lotus. Even granting that he had taken a fancy to a flower, the one selected is usually used as an ear-pendant (never as an armlet) and that, too, by ladies (and never by such a virile man as a king of his repute is considered to be). This inconsistency is removed by construing differently the word *kuvalaya*, meaning 'blue lotus'. It can be split into *ku* and *valaya* and then we have the other meaning 'globe', 'the ball of the earth'. In other words, what Kṛṣṇarāja is wearing on his arm is not a blue lotus but the whole world, which symbolically signifies that he is ruling over the earth or protecting it.

The instances so far cited are mostly of what Dr Bühler calls 'artificial poetry'. The verses quoted below are of a more natural kind, being descriptive of the Spring. They also illustrate the wedding of sound with sense: the music of words. The occasion is only the dating of an event, to wit, the construction of Devabhaṭa's *stūpa*, etc., mentioned above. Ravila, the poet, instead of mentioning the season by name, indicates it by saying:

bhṛṅgāṅgabhārālasabālapadme
kāle prapanne ramaṇīyasāle ।
gatāsu deśāntaritapriyāsu
priyāsu kāmajvalanāhutitvam ॥
nātyuṣṇaśītānilakampiteṣu
pravṛittamattānyabhṛtasvaneṣu ।
priyādharoṣṭhāruṇapallaveṣu
navāṁ vahatsūpavaneṣu kāntim ॥

[23] *EI*, XXVI, p. 289, verse 12

'At the advent of the time when the tender lotus-flower droops under the weight of the bee, when the sāl tree puts on the most charming appearance, when the young wives whose husbands happen to be away from home are consumed by the fire of love, when groves and gardens, astir with temperate breezes, start resounding with the warblings of the cuckoo and put forth young leaves as ruby-red as the lips of a damsel...'[24]

One more citation in closing will prove that ideas are afloat in the air at all times and in all climes. Poets catch and express them, each in his own language. This accounts for the fact that often the same idea occurs to two different poets, far removed from each other both in time and in space. Śiva, whose stanza is quoted below, lived in the fifth century A.D., somewhere in Vindhya Pradesh. In a chaste and innocent young lady he saw a stream of crystal clear water.

sphaṭikavimalaśubhraṁ bibhratī śīlatoyaṁ
yamaniyamataṭāntaprāntaśuddhapravāham ।
praśamaguṇagaṇormir-yā janaṁ pāvayantī
svayam-iha suralokād-āgatā Jāhnav-īva ॥

'...who is, as it were, the Ganges herself, from heaven descended, purifying the people here, possessing the water (in the form) of character pure and brilliant as crystal, with its serene flow bounded within the two banks of self-restraint and self-discipline, ripply with many virtues such as equanimity.'[25]

About 1300 years later, in England, the poet William Cowper caught the same vision.[26]

BAHADUR CHAND CHHABRA

[24] *EI*, XXVII, p. 16, verses 14 & 15
[25] *Ibid.*, p. 141, verse 9
[26] F.T. Palgrave's *Golden Treasury*, p. 129

ABBREVIATIONS

ACS = Antiquities of Chamba State
Champa = *Ancient·Indian Colonies in the Far East*, Vol. I, *Champa*, Book III—The Inscriptions of Champa, by R. C. Majumdar, Lahore, 1927
CII = Corpus Inscriptionum Indicarum
Vol. III—Fleet's Gupta Inscriptions
Vol. IV—Mirashi's Kalachuri Inscriptions
EI = Epigraphia Indica
IA = Indian Antiquary
IB = Inscriptions of Bengal
IC = Inscriptions du Cambodge
KS = Kāmarūpaśāsanāvalī
NIGC = Napalese Inscriptions in Gupta Characters

नृपरुद्रदामवर्णनम्

(Description of King Rudradāman)

·····निषादादीनां समग्राणां तत्प्रभावा[द्यथावत्प्राप्तधर्मार्थ]-कामविषयाणां विषयाणां पतिना (पत्या), सर्वक्षत्राविष्कृतवीरशब्द-जातोत्सेकाविधेयानां यौधेयानां प्रसह्योत्सादकेन, दक्षिणापथपतेः सात-कर्णेर्द्विरपि निर्व्याजमवजित्यावजित्य संबन्धाविदूरतयानुत्सादनात् प्राप्तयशसा, ······(प्त)विजयेन, भ्रष्टराजप्रतिष्ठापकेन, यथार्थ-हस्तोच्छ्र्यार्जितोर्जितधर्मानुरागेण, शब्दार्थगान्धर्वन्यायाद्यानां विद्यानां महतीनां पारणधारणविज्ञानप्रयोगावाप्तविपुलकीर्तिना, तुरगगजरथ-चर्यासिचर्मनियुद्धाद्या····परबललाघवसौष्ठवक्रियेण, अहरहर्दान-मानानवमानशीलेन, स्थूललक्षेण, यथावत्प्राप्तैर्बलिशुल्कभागैः कनक-रजतवज्रवैडूर्यरत्नोपचयविष्यन्दमानकोशेन, स्फुटलघुमधुरचित्रकान्त-शब्दसमयोदारालंकृतगद्यपद्य······न, प्रमाणमानोन्मानस्वरगति-वर्णसारसत्त्वादिभिः परमलक्षणव्यञ्जनैरुपेतकान्तमूर्तिना, स्वयमधिग-तमहाक्षत्रपनाम्ना, नरेन्द्रकन्यास्वयंवरानेकमाल्यप्राप्तदाम्ना, महाक्षत्र-पेण, रुद्रदाम्ना—

Junagadh Inscription of Rudradāman; *EI*, VIII, p. 4

A.D. 150

नृपसोमवर्णनम्

(Description of King Soma)

महता स्वशक्तिगुणगुरुणा पौरुषेण प्रथमचन्द्रदर्शनमिव मालव-गणविषयमवतारयित्वैकषष्टिरात्रमतिसत्रमपरिमितधर्ममात्रं समुद्धृत्य पितृपैतामहीं धुरमावृत्य सुविपुलं द्यावापृथिव्योरन्तरमनुत्तमेन यशसा स्वकर्मसंपदया विपुलां समुपागतामृद्धिमात्मसिद्धिं वितत्य मायामिव सत्रभूमौ सर्वकामौघधारां वसोर्धारामिव ब्राह्मणाग्निवैश्वानरेषु हुत्वा

ब्रह्मेन्द्रप्रजापतिमहर्षिविष्णुस्थानेषु कृतावकाशस्य पापनिरवकाशस्य सितसभावसथतडाककूपदेवायतनयज्ञदानसत्यप्रजाविपुलपालनप्रसंगैः पुराणराजर्षिधर्मपद्धतिसततकृतसमनुगमननिश्चयस्य स्वगुणातिशयविस्तरैर्मनुर्निर्विशेषमिव भुवि मनुष्यभावं यथार्थमनुभवत इक्ष्वाकुप्रथितराजर्षिवंशे मालववंशे प्रसूतस्य जयनर्तनप्रभाग्रवर्धनपौत्रस्य जयसोमपुत्रस्य सोगिनेतुः श्रीसोमस्य—

Nāndsā Yūpa Inscription; *EI*, XXVII, p. 264
A.D. 226

समुद्रगुप्तस्य नृपत्ववरणम्

(Selection of Samudragupta as King)

एह्येहीत्युपगुह्य भावपिशुनैरुत्कर्णितै रोमभिः
सभ्येषूच्छ्वसितेषु तुल्यकुलजम्लानाननोद्वीक्षितः।
स्नेहव्यालुलितेन बाष्पगुरुणा तत्त्वेक्षिणा चक्षुषा
यः पित्राभिहितो निरीक्ष्य निखिलां पाहि त्वमुर्वीमिति ।।

कीर्तिः

(Fame)

प्रदानभुजविक्रमप्रशमशास्त्रवाक्योदयै-
रुपर्युपरि सञ्चयोच्छ्रितमनेकमार्गं यशः।
पुनाति भुवनत्रयं पशुपतेर्जटान्तर्गुहा-
निरोधपरिमोक्षशीघ्रमिव पाण्डु गाङ्गं पयः ।।

हरिषेणस्य

Allahabad Inscription of Samudragupta; *CII*, III
A.D. 360

नृपपूर्णवर्मवर्णनम्

(Description of King Pūrṇavarman)

श्रीमान् दाता कृतज्ञो नरपतिरसमः यः पुरा तारुमायां
नाम्ना श्रीपूर्णवर्मा प्रचुररिपुशराभेद्यविख्यातवर्मा।
तस्येदं पादबिम्बद्वयमरिनगरोत्सादने नित्यदक्षं
भक्तानां यन्नृपाणां भवति सुखकरं शल्यभूतं रिपूणाम्॥

Jambu (in West Java) Rock Inscription of King Pūrṇavarman
द्विवेदी अभिनन्दनग्रंथ, p. 221
±A.D. 390

नृपविश्ववर्मवर्णनम्

(Description of King Viśvavarman)

धैर्येण मेरुमभिजातिगुणेन वैण्य-
मिन्दुं प्रभासमुदयेन बलेन विष्णुम्।
संवर्तकानलमसह्यतमं च दीप्त्या
यो विक्रमेण च सुराधिपतिं विजिग्ये॥

व्यावृत्तमार्ग इव भानुरसह्यमूर्ति-
र्व्यभ्रोदयाधिकतरोज्ज्वलघोरदीप्तिः।
यः शक्यते न रिपुभिर्भयविह्वलाक्षै-
रुद्वीक्षितुं क्षणमपि प्रगृहीतशस्त्रः॥

निर्भूषणैरविगतास्रजलार्द्रगण्डै-
र्विच्छिन्नमण्डनतयोज्ज्वलनष्टशोभैः।
यस्यारिकामिनिमुखाम्बुरुहैर्बलस्य
पूर्वं प्रतापचकितैः क्रियते प्रणामः॥

रत्नोद्गमद्युतिविरञ्जितकूलतालै-
रुत्त्रस्तनक्रमकरक्षतफेनमालैः ।
चण्डानिलोद्धततरङ्गसमस्तहस्तै-
र्यस्यार्णवैरपि बलानि नमस्क्रियन्ते ।।

भूरुद्धृतद्रुमविकम्पितशैलकील-
वित्रस्तविद्रुतमृगद्विजशून्यगुल्मा ।
यस्योन्नतप्रविषमीकृतराजमार्गा
सैन्यप्रयाणसमये विनिमज्जतीव ।।

प्रत्यस्तमौलिमणिरश्मिनखप्रभान्धै-
रभ्युद्यताञ्जलितया शबलाग्रगण्डैः ।
विद्याधरैः प्रियतमाभुजपाशबद्धै-
र्यस्यादराद्दिवि यशांसि नमस्क्रियन्ते ।।

अग्रेऽपि यो वयसि सम्परिवर्तमानः
शास्त्रानुसारपरिवर्धितशुद्धबुद्धिः ।
सद्धर्ममार्गमिव राजसु दर्शयिष्यन्
रक्षाविधिं भरतवज्जगतः करोति ।।

तस्मिन् प्रशासति महीं नृपतिप्रवीरे
स्वर्गं यथा सुरपतावमितप्रभावे ।
नाभूदधर्मनिरतो व्यसनान्वितो वा
लोके कदाचन जनः सुखवर्जितो वा ।।

विष्णुमन्दिरवर्णनम्

(Description of a Viṣṇu Temple)

. . . .

विष्णोः स्थानमकारयद्भगवतः श्रीमान्मयूराक्षकः ।।

कैलासतुङ्गशिखरप्रतिमस्य तस्य
दृष्ट्वाकृतिं प्रमुदितैर्वदनारविन्दैः ।
विद्याधराः प्रियतमासहिताः सुशोभ-
मादर्शबिम्बमिव यान्त्यवलोकयन्तः ।।

यां दृष्ट्वा सुरसुन्दरीकरतलव्याघृष्टपृष्ठक्षणं
प्रत्यावर्तनशङ्किनो रथहयान् आकृष्य चञ्चत्सटान् ।
पुण्योदर्कमतिप्रभावमुनिभिः संस्तूयमानोऽम्बरे
संकुच्याञ्जलिकुट्मलं नतशिरा भीतः प्रयात्यंशुमान् ।।

Gangdhar Inscription of Viśvavarman; *CII*, III, pp. 74-6
A.D. 424

विष्णुस्तुतिः

(Homage to Viṣṇu)

श्रियमभिमतभोग्यां नैककालापनीतां
त्रिदशपतिसुखार्थं यो बलेराजहार ।
कमलनिलयनायाः शाश्वतं धाम लक्ष्म्याः
स जयति विजितार्त्तिर्विष्णुरत्यन्तजिष्णुः ।।

नृपस्कन्दगुप्तवर्णनम्

(Description of King Skandagupta)

तदनु जयति शश्वत् श्रीपरिक्षिप्तवक्षाः
स्वभुजजनितवीर्यो राजराजाधिराजः।
नरपतिभुजगानां मानदर्पोत्फणानां
प्रकृतिगरुडाज्ञां निर्विषीं चावकर्ता ।।

नृपतिगुणनिकेतः स्कन्दगुप्तः पृथुश्रीः
चतुरुदधिजलान्तां स्फीतपर्यन्तदेशाम्।
अवनिमवनतारिर्यश्चकारात्मसंस्थां
पितरि सुरसखित्वं प्राप्तवत्यात्मशक्त्या ।।

. . . .

तस्मिन्नृपे शासति नैव कश्चिद्
धर्मादपेतो मनुजः प्रजासु।
आर्तो दरिद्रो व्यसनी कदर्यो
दण्ड्यो न वा यो भृशपीडितः स्यात् ।।

एवं स जित्वा पृथिवीं समग्रां
भग्नाग्रदर्पान् द्विषतश्च कृत्वा।
सर्वेषु देशेषु विधाय गोप्तॄन्
संचिन्तयामास बहुप्रकारम् ।।

स्यात् कोऽनुरूपो मतिमान् विनीतो
मेधास्मृतिभ्यामनपेतभावः।
सत्यार्जवौदार्यनयोपपन्नो
माधुर्यदाक्षिण्ययशोन्वितश्च ।।

भक्तोऽनुरक्तो नृविशेषयुक्तः
सर्वोपधाभिश्च विशुद्धबुद्धिः।
आनृण्यभावोपगतान्तरात्मा
सर्वस्य लोकस्य हिते प्रवृत्तः॥

न्यायार्जनेऽर्थस्य च कः समर्थः
स्यादर्जितस्याप्यथ रक्षणे च।
गोपायितस्यापि च वृद्धिहेतौ
वृद्धस्य पात्रप्रतिपादनाय॥

सर्वेषु भृत्येष्वपि संहतेषु
यो मे प्रशिष्यान्निखिलान् सुराष्ट्रान्।
आं ज्ञातमेकः खलु पर्णदत्तो
भारस्य तस्योद्वहने समर्थः॥

सुदर्शनतटाकवर्णनम्

(Description of the Lake Sudarśana)

अथ क्रमेणाम्बुदकाल आगते
निदाघकालं प्रविदार्य तोयदैः।
ववर्ष तोयं बहु सन्ततं चिरं
सुदर्शनं येन बिभेद चात्वरात्॥

. . . .

इमाश्च या रैवतकाद्विनिर्गताः
पलाशिनीयं सिकताविलासिनी।
समुद्रकान्ताश्चिरबन्धनोषिताः
पुनः पतिं शास्त्रयथोचितं ययुः॥

अवेक्ष्य वर्षागमजं महोद्भ्रमं
महोदधेरूर्जयता प्रियेप्सुना ।
अनेकतीरान्तजपुष्पशोभितो
नदीमयो हस्त इव प्रसारितः ।।

विषाद्यमानाः खलु सर्वतो जनाः
कथं कथं कार्यमिति प्रवादिनः ।
मिथो हि पूर्वापररात्रमुत्थिता
विचिन्तयां चापि बभूवुरुत्सुकाः ।।

. . . .

बबन्ध यत्नान्महता नृदेवान्
अभ्यर्च्य सम्यग्घटितोपलेन ।
अजातिदुष्टं प्रथितं तटाकं
सुदर्शनं शाश्वतकल्पकालम् ।।

Junagadh Rock Inscription of Skandagupta; *CII*, III, pp. 58-60
A.D. 458

सूर्यस्तुतिः

(Homage to Sūrya)

यो वृत्त्यर्थमुपास्यते सुरगणैः सिद्धैश्च सिद्धर्थिभि-
र्ध्यानैकाग्रपरैर्विधेयविषयैर्मोक्षार्थिभिर्योगिभिः ।
भक्त्या तीव्रतपोधनैश्च मुनिभिः शापप्रसादक्षमै-
र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्स वो भास्करः ।।

तत्त्वज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्षयोऽभ्युद्यतः
कृत्स्नं यश्च गभस्तिभिः प्रविसृतैः पुष्णाति लोकत्रयम् ।

मिरसिद्धकिन्नरनरैः संस्तूयतेऽभ्युत्थितो
भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ।।

यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-
विस्तीर्णतुङ्गशिखरस्खलितांशुजालः ।
क्षीबाङ्गनाजनकपोलतलाभिताम्रः
पायात्स वः सुकिरणाभरणो विवस्वान् ।।

दशपुरवर्णनम्

(Description of Daśapura)

तटोत्थवृक्षच्युतनैकपुष्प-
विचित्रतीरान्तजलानि भान्ति ।
प्रफुल्लपद्माभरणानि यत्र
सरांसि कारण्डवसंकुलानि ।।

विलोलवीचीचलितारविन्द-
पतद्रजः पिञ्जरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः
क्वचित्सरांस्यम्बुरुहैश्च भान्ति ।।

स्वपुष्पभारावनतैर्नगेन्द्रै-
र्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभि-
र्वनानि यस्मिन् समलंकृतानि ।।

चलत्पताकान्यबलासनाथा-
न्यत्यर्थशुक्लान्यधिकोन्नतानि ।

तडिल्लताचित्रसिताभ्रकूट-
　　तुल्योपमानानि गृहाणि यत्र ।।

कैलासतुङ्गशिखरप्रतिमानि चान्या-
　　न्याभान्ति दीर्घवलभीनि सवेदिकानि ।
गान्धर्वशब्दमुखराणि निविष्टचित्र-
　　कर्माणि लोलकदलीवनशोभितानि ।।

प्रासादमालाभिरलङ्कृतानि
　　धरां विदार्येव समुत्थितानि ।
विमानमालासदृशानि यत्र
　　गृहाणि पूर्णेन्दुकरामलानि ।।

यद् भात्यभिरम्यसरिद्-
　　द्वयेन चपलोर्मिणा समुपगूढम् ।
रहसि कुचशालिनीभ्यां
　　प्रीतिरतिभ्यां स्मराङ्गमिव ।।

नृपबन्धुवर्मवर्णनम्

(Descripticn of King Bandhuvarman)

कान्तो युवा रणपटुर्विनयान्वितश्च
　　राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।
शृङ्गारमूर्तिरभिभात्यनलंकृतोऽपि
　　रूपेण यः कुसुमचाप इव द्वितीयः ।।

वैधव्यतीव्रव्यसनक्षतानां
　　स्मृत्वा यमद्याप्यरिसुन्दरीणाम् ।

भयाद्भवत्यायतलोचनानां
घनस्तनायासकरः प्रकम्पः ।।

दशपुरं तत्रस्थं सूर्यमन्दिरं च

(Daśapura and its Sun-temple)

शशिनेव नभो विमलं
कौस्तुभमणिनेव शार्ङ्गिणो वक्षः ।
भवनवरेण तथेदं
पुरमखिलमलंकृतमुदारम् ।।

अमलिनशशिलेखादन्तुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानाम् ।
विकचकमलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतं तावदस्तु ।।

वत्सभट्टिः

Mandasor Inscription of Bandhuvarman; *CII*, III, pp. 81-4
A.D. 473

नृपमाधववर्णनम्

(Description of King Mādhava)

स्वस्ति । जितं भगवता गतघनगगनाभेन पद्मनाभेन ! श्रीमज्जाह्नवेय-कुलामलव्योमभासनभास्करस्य स्वभुजजवजयजनितसुजन-जनपदस्य दारुणारिगणविदारणोपलब्धव्रणभूषणस्य काण्वा-यनसगोत्रस्य श्रीमत्कोङ्कणिवर्मधर्ममहाधिराजस्य पुत्रस्य पितुरन्वागतगुणस्य नानाशास्त्रार्थसद्भावाधिगमप्रणीतमति-

विशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलस्य सम्यक्-
प्रजापालनमात्राधिगतराज्यप्रयोजनस्य श्रीमन्माधवमहा-
धिराजस्य—

Penukoṇḍa Plates of Mādhava II; *EI*, XIV, pp. 334-5
±A.D. 475

विष्णुस्तुतिः

(Homage to Viṣṇu)

जयति विभुश्चतुर्भुज-
श्चतुरर्णवविपुलसलिलपर्यङ्कः।
जगतः स्थित्युत्पत्ति-
व्ययादिहेतुर्गरुडकेतुः॥

Eran Inscription of Budhagupta; *CII*, III, p. 89
A.D. 485

शिवस्तुतिः

(Homage to Śiva)

स जयति जगतां पतिः पिनाकी
स्मितरवगीतिषु यस्य दन्तकान्तिः।
द्युतिरिव तडितां निशि स्फुरन्ती
तिरयति च स्फुटयत्यदश्च विश्वम्॥

स्वयम्भूर्भूतानां स्थितिलयसमुत्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शम्भुर्भूयांसि प्रतिदिशतु भद्राणि भवताम्॥

फणमणिगुरुभाराक्रान्तिदूरावनम्रं
स्थगयति रुचिमिन्दोर्मण्डलं यस्य मूर्ध्नाम्।
स शिरसि विनिबध्नन् रन्ध्रिणीमस्थिमालां
सृजतु भवसृजो वः क्लेशभङ्गं भुजङ्गः॥

नृपयशोधर्मवर्णनम्

(Description of King Yaśodharman)

अथ जयति जनेन्द्रः श्रीयशोधर्मनामा
प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य।
व्रणकिसलयभङ्गैर्योऽङ्गभूषां विधत्ते
तरुणतरुलतावद् वीरकीर्तीर्विनाम्य॥

नृपविष्णुवर्धनवर्णनम्

(Description of King Viṣṇuvardhana)

आजौ जिती विजयते जगतां पुनश्च
श्रीविष्णुवर्धननराधिपतिः स एव।
प्रख्यात औलिकरलाञ्छन आत्मवंशो
येनोदितोदितपदं गमितो गरीयः॥

प्राचो नृपान् सुबृहतश्च बहूनुदीचः
साम्ना युधा च वशगान् प्रविधाय येन।
नामापरं जगति कान्तमदो दुरापं
राजाधिराजपरमेश्वर इत्युदूढम्॥

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भोमेध्यं मघोनावधिषु विदधता गाढसंपन्नसस्याः।

संहृषद्वाणिनीनां कररभसहृतोद्यानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुजविजितभुवा भूरयो येन देशाः ।।

यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेन वनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्बलैः ।
बालेयच्छविधूसरेण रजसा मन्दांशु संलक्ष्यते
पर्यावृत्तशिखण्डिचन्द्रक इव ध्यामं रवेर्मण्डलम् ।।

तिथिकालादि कीर्तनम्

(Mention of Date, Time, etc.)

पञ्चसु शतेषु शरदां
यातेष्वेकान्ननवतिसहितेषु ।
मालवगणस्थितिवशात्
कालज्ञानाय लिखितेषु ।।

यस्मिन् काले कलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवनं भारमन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्पकेतोः ।।

प्रियतमकुपितानां रामयन् बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनाम् ।
उपनयति नभस्वान् मानभङ्गाय यस्मिन्
कुसुमसमयमासे तत्र निर्मापितोऽयम् ।।

Mandasor Inscription of Yaśodharman & Viṣṇuvardhana; *CII*, III, pp.152-4
A.D. 533

शिवस्तुतिः

(Homage to Śiva)

वेपन्ते यस्य भीमस्तनितभयसमुद्भ्रान्तदैत्या दिगन्ताः
शृङ्गाघातैः सुमेरोर्विघटितदृषदः कन्दरा यः करोति।
उक्षाणं तं दधानः क्षितिधरतनयादत्तपञ्चाङ्गुलाङ्कं
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतुः।।

नृपयशोधर्मवर्णनम्

(Description of King Yaśodharman)

आविर्भूतावलेपैरविनयपटुभिर्लङ्घिताचारमार्गै-
र्मोहादैदंयुगीनैरपशुभरतिभिः पीड्यमाना नरेन्द्रैः।
यस्य क्ष्मा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिणाङ्कप्रकोष्ठं
बाहुं लोकोपकारव्रतसफलपरिस्पन्दधीरं प्रपन्ना।।

निन्द्याचारेषु योऽस्मिन् विनयमुषि युगे कल्पनामात्रवृत्त्या
राजस्वन्येषु पांसुष्विव कुसुमबलिर्नाबभासे प्रयुक्तः।
स श्रेयोधाम्नि सम्राडिति मनुभरतालर्कमान्धातृकल्पे
कल्याणे हेम्नि भास्वान् मणिरिव सुतरां भ्राजते यत्र शब्दः।।

ये भुक्ता गुप्तनाथैर्न सकलवसुधाक्रान्तिदृष्टप्रतापै-
र्नाज्ञा हूणाधिपानां क्षितिपतिमुकुटाध्यासिनी यान् प्रविष्टा।
देशांस्तान् धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढान्
वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति।।

आ लौहित्योपकण्ठात्तलवनगहनोपत्यकाद् आ महेन्द्राद्
आ गङ्गाश्लिष्टसानोस्तुहिनशिखरिणः पश्चिमाद् आ पयोधेः।

सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
श्चूडारत्नांशुराजि व्यतिकरशबला भूमिभागाः क्रियन्ते ।।

स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गं
यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्गशब्दाभिमानम् ।
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनक्लिष्टमूर्ध्ना
चूडापुष्पोपहारैर्मिहिरकुलनृपेणार्चितं पादयुग्मम् ।।

कीर्तिस्तम्भवर्णनम्

(Description of Victory Pillar)

गामेवोन्मातुमूर्ध्वं विगणयितुमिव ज्योतिषां चक्रवालं
निर्देष्टुं मार्गमुच्चैर्दिव इव सुकृतोपार्जितायाः स्वकीर्तेः ।
तेनाकल्पान्तकालावधिरवनिभुजा श्रीयशोधर्मणायं
स्तम्भः स्तम्भाभिरामस्थिरभुजपरिघेणोच्छ्रितिं नायितोऽत्र ।।

श्लाघ्ये जन्मास्य वंशे चरितमघहरं दृश्यते कान्तमस्मिन्
धर्मस्यायं निकेतश्चलति नियमितं नामुना लोकवृत्तम् ।
इत्युत्कर्षं गुणानां लिखितुमिव यशोधर्मणश्चन्द्रबिम्बे
रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमान् यः पृथिव्या विभाति ।।

वासुलस्य

Mandasor Inscription of Yaśodharman; *CII*, III, pp. 146-7
A.D. 534

बुद्धस्तुतिः

(Homage to the Buddha)

संसारस्थिरबन्धनात् कृतमतिर्मोक्षाय यो देहिनां
कारुण्यात् प्रसभं शरीरमपि यो दत्त्वा तुतोषार्थिने ।
सेन्द्रैर्यः स्वशिरः किरीटमकरीघृष्टांह्रिपद्मः सुरै-
स्तस्मै सर्वपदार्थतत्त्वविदुषे बुद्धाय नित्यं नमः ।।

नृपयशोवर्मदेववर्णनम्

(Description of King Yaśovarmadeva)

सर्वेषां मूर्ध्नि दत्त्वा पदमवनिभृतामुद्गतो भूरिधामा
निस्त्रिंशांशुप्रतानप्रदलितनिखिलारातिघोरान्धकारः ।
ख्यातो यो लोकपालः सकलवसुमतीपद्मिनीबोधहेतुः
श्रीमान् भास्वानिवोच्चैस्तपति दिशि दिशि श्रीयशोवर्मदेवः ।।

नालन्दावर्णनम्

(Description of Nālandā)

यासार्वूजितवैरिभूप्रविगलद्दानाम्बुपानोल्लस-
न्माद्यद्भृङ्गकरीन्द्रकुम्भदलनप्राप्तश्रियां भूभुजाम् ।
नालन्दा हसतीव सर्वनगरीः शुभ्राभ्रगौर स्फुर-
च्चैत्यांशुप्रकरैः सदागमकलाविख्यातविद्वज्जना ।।

यस्यामम्बुधरावलेहिशिखरश्रेणी विहारावली
मालेवोर्ध्वविराजिनी विरचिता धात्रा मनोज्ञा भुवः ।
नानारत्नमयूखजालखचितप्रासाददेवालया
सद्विद्याधरसंघरम्यवसतिर्धत्ते सुमेरोः श्रियम् ।।

बुद्धमन्दिरवर्णनम्

(Description of a Buddha Temple)

. . . .

प्रासादः सुमहानयं भगवतः शौद्धोदनेरद्भुतः
कैलासाभिभवेच्छयेव धवलो मन्ये समुत्थापितः ।।

न्यक्कुर्वन्निन्दुकान्तिं तुहिनगिरिशिरःश्रेणिशोभां निरस्यन्
शुभ्रामाकाशगङ्गां तदनु मलिनयन् मूकयन् वादिसिन्धून् ।
मन्ये जेतव्यशून्ये भुवन इह वृथा भ्रान्तिरित्याकलय्य
भ्रान्त्वा क्षोणीमशेषां जितविपुलयशस्तम्भ उच्चैः स्थितो वा ।।

. . . .

चन्द्रो यावच्चकास्ति स्फुरदुरुकिरणो लोकदीपश्च भास्वान्
एषा यावच्च धात्री सजलधिवलया द्यौश्च दत्तावकाशा ।
यावच्चैते महान्तो भुवनभरधुरां धारयन्तो महीध्रा-
स्तावच्चन्द्रावदाता धवलयतु दिशां मण्डलं कीर्तिरेषा ।।

शीलचन्द्र स्वामिदत्तयोः

Nālandā Inscription of Yaśovarmadeva's time; *EI.* XX, pp. 43-4
±A.D. 534

शिवस्तुतिः

(Homage to Śiva)

जयतीन्दुरविव्योम-
वाय्वात्मक्ष्माजलानलैः ।
तनोति तनुभिः शम्भु-
र्योऽष्टाभिरखिलं जगत् ।।

नृपभववर्मवर्णनम्

(Description of King Bhavavarman)

राजा श्रीभववर्मेति
भवत्यधिकशासनः ।

सोमवंश्योऽप्यरिध्वान्त-
प्रध्वंसनदिवाकरः ।।

IC, I, 4
± A.D. 561

बुद्धस्तुतिः

(Homage to the Buddha)

व्याप्तो येनाप्रमेयः सकलशशिरुचा सर्वतः सत्त्वधातुः
क्षुण्णाः पाषण्डयोधाः सुगतिपथरुधस्तर्कशास्त्राभियुक्ताः ।
सम्पूर्णो धर्मकोषः प्रकृतिरिपुहृतः साधितो लोकभूत्यै
शास्तुः शाक्यैकबन्धोर्जयति चिरतरं तद्यशः सारतन्त्रम् ।।

महाकाश्यपस्तुतिः

(Homage to Mahākāśyapa)

नैरोधीं शुभभावनामनुसृतः संसारसंक्लेशजि-
न्मैत्रेयस्य करे विमुक्तिवशिता यस्याद्भुता व्याकृता ।
निर्वाणावसरे च येन चरणौ दृष्टौ मुनेः पावनौ
पायाद्वः स मुनीन्द्रशासनधरः स्तुत्यो महाकाश्यपः ।।

बुद्धमन्दिरवर्णनम्

(Description of a Buddha Temple)

आम्रद्वीपाधिवासी पृथुकुलजलधिस्तस्य शिष्यो महीयान्
लङ्काद्वीपप्रसूतः परहितनिरतः सन्महानामनामा ।
तेनोच्चैर्बोधिमण्डे शशिकरधवलः सर्वतो मण्डपेन
कान्तः प्रासाद एष स्मरबलजयिनः कारितो लोकशास्तुः ।।

व्यपगतविषयस्नेहो हततिमिरदशः प्रदीपवदसङ्गः ।
कुशलेनानेन जनो बोधिसुखमनुत्तरं भजताम् ।।

यावद्ध्वान्तापहारी प्रविततकिरणः सर्वतो भाति भास्वान्
यावत्पूर्णोऽम्बुराशिः फणिफणकुटिलैरूर्मिचक्रैः समन्तात् ।
यावच्चेन्द्राधिवासो विविधमणिशिलाचारुशृङ्गः सुमेरुः
शोभाढ्यं तावदेतद्भुवनमुरुमुनेः शाश्वतत्वं प्रयातु ।।

Bodh-Gaya Inscription of Mahanāman; *CII*, III, pp. 276-7
A.D. 589

शिवस्तुतिः

(Homage to Śiva)

सृष्टं येन त्रितयमखिलं भूर्भुवः स्वः स्वशक्त्या
येनोत्खातं भुवनदुरितं वह्निनेवान्धकारम् ।
यस्याचिन्त्यो जगति महिमा यस्य नादिर्नचान्त-
श्चम्पादेशे जनयतु सुखं शम्भुभद्रेश्वरोऽयम् ।।

My-son Stelae Inscription of Śambhuvarman; *Champa*, p. 10
A.D. 600

नृपप्रकाशधर्मवर्णनम्

(Description of King Prakāśadharma)

सोऽयमुदितोदितमानवेन्द्रमहनीयान्वयमहत्तरदुरवापपर्यन्तक्षीर-पयोनिधिपूर्वभागोदितनिर्मलमयूखपर्याप्तमण्डलक्षपानाथः, क्षपित-महाभिमानदुष्कृतसपत्नसंघसंस्तुतनिसर्गवीर्यः, वीर्यदृढतरैकसार्थपार्थिव-गुणोपात्तपालितसंवर्धितार्हतीर्थापादितराज्यः, लक्ष्मीनिरूपितवैचक्षण्यः,

श्रीमान्, श्रीचम्पापुरपरमेश्वरो महाराजः श्रीविक्रान्तवर्मेत्युपात्त-विजयाभिषेकनामा, श्रीप्रकाशधर्मो नवसप्तत्युत्तरपञ्चवर्षशतातीत-शकावनीन्द्रकालपरिमाणं तपस्यसितदशाहार्कवासरादित्यर्क्षवृषभो-दयैकादशघटिकानवद्यहोरादिपुरःसरं मीनयुगायातार्कबुधभार्गवं तुला-धरस्थभौमसौरं घटधरसंस्थवाचस्पतिनरयुग्मोपगतताराधिपशोभनमि-त्याजवञ्जवी भावसामर्थ्यबीजसंहृति चिकीर्षया सकलभुवनैकनाथं श्रीप्रभासेश्वरं प्रतिष्ठापितवान्।

A.D. 657

शिवस्तुतिः

(Homage to Śiva)

स्वाः शक्तीः प्रतियोग्यतामुपगता क्षित्यादयो मूर्तयो
लोकस्थित्युदयादिकार्यपरता ताभिर्विना नास्ति हि।
इत्येवं विगणय्य शक्तिवशिना येनाध्रियन्तेऽथवा
का नामेह विभुः क्रिया न भजते या स्युः पदार्थोदये॥

यो ब्रह्मविष्णुत्रिदशाधिपादि-
सुरासुरब्रह्मनृपर्षिमान्यः।
तथापि भूत्यै जगतामनृत्य-
च्छ्मशानभूमावतिचित्रमेतत्॥

यतो जगत्स्थाष्णु(स्नु) चरिष्णुरूपं
विवर्ततेऽर्कादिव रश्मिजालम्।
यत्रैव भूयः प्रतिलीयते तद्
अहो विचित्रो महतां निसर्गः॥

यस्यातीतमनोगतेरपि सतो हेतोर्जगज्जन्मनां
प्रेयोनन्त्यफलप्रदा स्मृतिरपि व्यक्तिः पुनः का कथा।

सौस्थित्यप्रभवोपलब्धिविधये चम्पानगर्यां स्थिरं
स्थेयादा भुवनस्थितेर्विभुरयं स श्रीप्रभासेश्वरः ।।

My-son Stelae Inscription of Prakāśadharma; *Champa*, p. 20)
Śaka 579
A.D. 657

नृपदद्दवर्णनम्

(Description of King Dadda III)

सततलक्ष्मीनिवासभूते तृष्णासन्तापहारिणि दीनानाथविस्तारितानुभावे द्विजकुलोपजीव्यमानविभवशालिनि महति महाराजकर्णान्वये कमलाकर इव राजहंसः प्रबलकलिकालविलसिताकलितविमलस्वभावो गम्भीरोदारचरितविस्मापितसकललोकपालमानसः परमेश्वरश्रीहर्षदेवाभिभूतवलभीपतिपरित्राणोपजातभ्रमदभ्रशुभ्राभ्रविभ्रमयशोवितानः श्रीदद्दस्तस्य सूनुरशङ्कितागतप्रणयिजनोपभुक्तविभ्रवसंचयोपचीयमानमनोनिर्वृतिरनेककण्टकभटसन्दोहदाहदुर्ललितप्रतापानलो निशितनिस्त्रिंशधारादारितारातिकरिकुम्भमुक्तमुक्ताफलच्छलोल्लसितसितयशोंशुकावगुण्ठितदिग्वधूवदनसरसिजः श्रीजयभटस्तस्यात्मजो महामुनिमनुप्रणीतवचनाधिगमविवेकस्वधर्मानुष्ठानप्रवणो वर्णाश्रमव्यवस्थोन्मूलितसकलकलिकालावलेपः प्रणयिजनमनोरथविषयव्यतीतविभवसम्पादनापनीताशेषशेषपार्थिवदानाभिमानो मदविवशाङ्कुशातिवर्तिकुपितकरिनिवारणाप्रथितगुरुगजाधिरोहणप्रभावो विपत्प्रपातपतितनरपतिशताभ्युद्धरणनिखिललोकविश्रुतपरोपकारकरणव्यसनः प्राच्यप्रतीच्याधिराजविजृम्भितमहासंग्रामनरपतिसहस्रपरिवारितानेकगजघटाविघटनप्रकटितभुजवीर्यविख्यातबाहुसहायापरनामा परममाहेश्वरः समधिगतपञ्चमहाशब्दः श्रीदद्दः कुशली——

Prince of Wales Museum, Plates of Dadda III; Year 427; *EI*, XXVII, pp. 199-200
A.D. 675

शिवस्तुतिः

(Homage to Śiva)

यं सर्वदेवाः ससुरेशमुख्या
ध्यायन्ति तत्तत्त्वविदश्च सन्तः ।
स्वस्थः सुशुद्धः परमो वरेण्य
ईशाननाथः स जयत्यजस्रम् ।।

स्मृतिरपि यस्य सकृदपि प्रणिपतितान् तारयत्यपायेभ्यः ।
स श्रीभद्रेश्वरोऽस्तु प्रजाहितार्थं तथा प्रभासेशः ।।

ईशानकोशमुकुटप्रतिष्ठा

(Consecration of Crest & Crown of Śiva)

ईशानेश्वरकोशं संस्थाप्य यथाविधि स्वभक्तिवशात् ।
श्रीमान् प्रकाशधर्मो मुकुटं भद्रेश्वरायादात् ।।

कोशमुकुटोभयं तत्कीर्तिस्तम्भद्वयोपमेयमिव ।
यावच्चन्द्रादित्यौ तावदिदं सुस्थितं जगति ।।

सूर्येऽस्मिन्नुदयं गते हिमकरो यात्यस्तमिन्दूदये
तस्मिंश्चास्तमितो रविः पुनरिति प्रायेण लोकस्थितिः ।
ईशानेश्वरकोशनिर्मलशशी भद्रेशमौल्यंशुमांस्-
तावेतौ सततोदितौ विहितवान् विक्रान्तवर्मा नृपः ।।

My-son Stelae Inscription of Vikrāntavarman I; Śaka 609; *Champa*, pp. 79-80
A.D. 687

शिवस्तुतिः

(Homage to Śiva)

ऐश्वर्यातिशयप्रदो मखभुजां यस्तप्यमानस्तपः
कन्दर्पोत्तमविग्रहप्रदहनो हैमाद्रिजायाः पतिः।
लोकानां परमेश्वरत्वमसमं यातो नदद्वाहनो
याथातथ्यविशारदास्तु जगतामीशस्य नो सन्ति हि ॥

इच्छातीतवरप्रदानवशिनं भक्त्या समाराध्य यं
त्रैलोक्यप्रभवप्रभावमहता वृत्रस्य हन्त्रा विना।
भुङ्क्तेऽद्याप्युपमन्युरिन्दुधवलं क्षीरार्णवं बान्धवैः
श्रीशानेश्वरनाथ एष भगवान् पायादपायात् स वः ॥

यस्यात्मानः सकलमरुतां मानिनां माननीया
अष्टौ पुण्या वरहितकृतः सर्वलोकान् वहन्ति।
अन्योन्यस्य स्वगुणविदयागाढसंबध्यमाना
योग्या युग्या इव पथि पथि स्यन्दनान् स्यन्दमानान् ॥

सावित्रीज्यासनाथ प्रणवदृढधनुर्मुक्तबाणारिबाणं
कृत्वा सोमोरुपुङ्खं स्फुरदनलमुखं सारथीडाविरिञ्चम्।
अष्टार्धब्रह्मधुर्यं सकलसुरमयस्यन्दनं विष्टपानां
शान्त्यर्थं येन दाहो युगपदपि पुरा त्रैपुराणां पुराणाम् ॥

तेनान्यदेवताविशेषपरमदुरधिगमाणिमादिगुणैश्वर्येणाप्यफल-निमित्ततपश्चरणपरायणेन, कटाक्षिचकदनलशिखाश्रेणिभूतिसात्कृत-मदननिरुपमापघनेनापि वल्लभतुहिनवदमलहितदुहितृकेन, सकल-भुवनैकपरमेश्वरेणापि गगनतलगमनकर्कशकर्कवरपत्रेण, दुरवगम-परमार्थभवेन, वाङ्मनसगोचरातीतस्वरूपेणाप्यवनिवनपवनसखपवन-

नदपथदशशतकिरणशतकिरणदीक्षिततनुभिरतनुप्रभावाभिः शर्वभव-
शुपतीशानभीमरुद्रमहादेवोग्राभिधानप्रधानसमुपबृंहिताभिराविर्भावित-
त्रश्वमूर्तिना, नलिननाभनलिनविष्टहव्यवाहनप्रमुखमुख्यसहायेन,
सुरमुनिगन्धर्वादिसकललोकविध्वंसनकरत्रिपुरमहासुरोद्धरेणानुमिता-
मतप्रभावेण, भगवता श्रीशम्भुभद्रेश्वरपरमभट्टारकेण जितम् ।

y-son Stelae Inscription of Vikrāntavarman I; *Champa*, 32-3
= A.D. 690

नृपहस्तिवर्मवर्णनम्

(Description of Hastivarman)

ॐ स्वस्ति । सर्वर्तुसुखरमणीयाद् विजयकलिङ्गनगरात् सकल-
वनननिर्माणैकसूत्रधारस्य भगवतो गोकर्णस्वामिनश्चरणकमलप्रणामाद्
पगतकलिकलङ्को विनयनयसम्पदामाधारः स्वासिधारापरिस्पन्दाधि-
तसकलकलिङ्गाधिराज्यश्चतुरुदधितरङ्गमेखलावनितलप्रवितताकमल-
शा अनेकसमरसंक्षोभजनितजयशब्दो गाङ्गामलकुलप्रतिष्ठः प्रतापा-
नशयानामितसमस्तसामन्तचूडामणिप्रभामञ्जरीपुञ्जरञ्जितचरणो
ातापितृपादानुध्यातः परममाहेश्वरः श्रीमहाराजो हस्तिवर्मा—

शासनम्

(Edict)

मण्डलाग्राग्रनिष्पेषनिष्पिष्टारातिसंहृतेः ।
श्रीमतोऽप्रतिघातस्य रणभीतस्य शासनम् ।।

विनयचन्द्रस्य

rlam Plates of Hastivarman; *EI*, XVII, 332-337
: A. D.700

दुर्गास्तुतिः

(Homage to Durgā)

उन्निद्रस्य सरोरुहस्य सकलामाक्षिप्य शोभां रुचा
सावज्ञं महिषासुरस्य शिरसि न्यस्तः क्वणन्नूपुरः ।
देव्या वः स्थिरभक्तिवादसदृशीं युञ्जन्फलेनार्थितां
दिश्यादच्छनखांशुजालजटिलः पादः पदं संपदाम् ।।

Nāgārjunī Inscription of Anantavarman; *CII*, III, p. 227
± A.D. 700

नृपकृष्णगुप्तवर्णनम्

(Description of King Kṛṣṇagupta)

आसीद्दन्तिसहस्रगाढकटको विद्याधराध्यासितः
सद्वंशः स्थिर उन्नतो गिरिरिव श्रीकृष्णगुप्तो नृपः ।
दृप्तारातिमदान्धवारणघटाकुम्भस्थलीः क्षुन्दता
यस्यासंख्यरिपुप्रतापजयिना दोष्णा मृगेन्द्रायितम् ।।

नृपजीवितगुप्तवर्णनम्

(Description of King Jīvitagupta)

श्रीजीवितगुप्तोऽभूत्
क्षितीशचूडामणिः सुतस्तस्य ।
यो दृप्तवैरिनारी-
मुखनलिनवनैकशिशिरकरः ।।

मुक्तामुक्तपयःप्रवाहशिशिरासूत्तुङ्गतालीवन-
भ्राम्यद्दन्तिकरावलूनकदलीकाण्डासु वेलास्वपि।
श्च्योतत्स्फारतुषारनिर्झरपयःशीतेऽपि शैले स्थितान्
यस्योच्चैर्द्विषतो मुमोच न महाघोरः प्रतापज्वरः॥

यस्यातिमानुषं कर्म्म
दृश्यते विस्मयाज्जनौघेन।
अद्यापि कोशवर्धन-
तटात्प्लुतं पवनजस्येव॥

नृपादित्यसेनवर्णनम्

(Description of King Ādityasena)

...........................।
न्यस्ताशेषनरेन्द्रमौलिचरणस्फारप्रतापानलो
लक्ष्मीवान् समराभिमानविमलप्रख्यातकीर्तिर्नृपः॥

येनेयं शरदिन्दुबिम्बधवला प्रख्यातभूमण्डला
लक्ष्मीसंगमकाङ्क्षया सुमहती कीर्तिश्चिरं कोपिता।
याता सागरपारमद्भुततमा सापत्न्यवैरादहो
तेनेदं भवनोत्तमं क्षितिभुजा विष्णोः कृते कारितम्॥

Aphsad Inscription of Ādityasena; *CII*, III, pp. 202-4
± A.D. 700

नृपयज्ञवर्मवर्णनम्

(Description of King Yajñavarman)

आसीत्सर्वमहीक्षितामनुरिव क्षत्त्रस्थितेर्देशिकः
श्रीमन्मत्तगजेन्द्रखेलगमनः श्रीयज्ञवर्मा नृपः।

यस्याहूतसहस्रनेत्रविरहक्षामा सदैवाध्वरैः
पौलोमी चिरमश्रुपातमलिनां धत्ते कपोलश्रियम् ॥

. . . .

आसीदिष्टसमृद्धयज्ञमहिमा श्रीयज्ञवर्मा नृपः
प्रख्यातो विमलेन्दुनिर्मलयशाः क्षात्रस्य धाम्नः पदम् ।
प्रज्ञानान्वयदानविक्रमगुणैर्यो राजकस्याग्रणी-
र्भूत्वापि प्रकृतिस्थ एव विनयादक्षोभ्यसत्त्वोदधिः ॥

Nāgārjunī Inscription of Anantavarman; *CII*, III, pp. 224 and 227
± A.D. 700

नृपदामोदरवर्मवर्णनम्

(Description of King Dāmodaravarman)

विजयकन्दरपुरात् । भगवतः सम्यक्संबुद्धस्य पादानुध्यातस्य आनन्दसगोत्रस्य अवन्ध्यगोसहस्रानेकहिरण्यगर्भोद्भवोद्भवस्य महाराजश्रीदामोदरवर्मणो वचनेन कङ्गूरग्रामेयका वक्तव्याः—

Maṭṭepāḍ Plates of Dāmōdaravarman; *EI*, XVII, p. 329
± A.D. 700

देवीराज्यवतीतत्पुत्रनृपमानदेवसंवादः

(Dialogue between Queen Rājyavatī and her son King Mānadeva)

प्रत्यागत्य सगद्गदाक्षरमिदं दीर्घं विनिःश्वस्य च
प्रेम्णा पुत्रमुवाच साश्रुवदना यातः पिता ते दिवम् ।
हा पुत्रास्तमिते तवाद्य पितरि प्राणैर्वृथा किं मम
राज्यं पुत्रक कारयाहमनुयाम्यद्यैव भर्तुर्गतिम् ॥

किं मे भोगविधानविस्तरकृतैराशामयैर्बन्धनै-
मर्यास्वप्ननिभे समागमविधौ भर्त्रा विना जीवितुम् ।
यामीत्येवमवस्थिता खलु तदा दीनात्मना सूनुना
पादौ भक्तिवशान्निपीड्य शिरसा विज्ञापिता यत्नतः ।।

किं भोगैर्मम किं हि जीवितसुखैस्त्वद्विप्रयोगे सति
प्राणान् पूर्वमहं जहामि परतस्त्वं यास्यसीतो दिवम् ।
इत्येवं मुखपङ्कजान्तरगतैर्नेत्राम्बुमिश्रैर्दृढं
वाक्पाशैर्विहगीव पाशवशगा बद्धा ततस्तस्थुषी ।।

देवीराज्यवतीवर्णनम्

(Description of Queen Rājyavatī)

सत्पुत्रेण सहौर्ध्वदेहिकविधिं भर्तुः प्रकृत्यात्मना
शीलत्यागदमोपवासनियमैरेकान्तशुद्धाशया ।
विप्रेभ्योऽपि च सर्वदा प्रददती तत्पुण्यवृद्ध्यै धनं
तस्थौ तद्धृदया सती व्रतविधौ साक्षादिवारुन्धती ।।

नृपमानदेववर्णनम्

(Description of King Mānadeva)

पुत्रोऽप्यूर्जितसत्त्वविक्रमधृतिः क्षान्तः प्रजावत्सलः
कर्ता नैव विकत्थनः स्मितकथः पूर्वाभिभाषी सदा ।
तेजस्वी न च गर्वितो न च परां लोकज्ञतां नाश्रितो
दीनानाथसुहृत् प्रियातिथिजनः प्रत्यर्थिनां माननुत् ।।

अस्त्रापास्त्रविधानकौशलगुणैः प्रज्ञातसत्पौरुषः
श्रीमच्चारुभुजः प्रमृष्टकनकश्लक्ष्णावदातच्छविः ।
पीनांसो विकचासितोत्पलदलप्रस्पर्धमानेक्षणः
साक्षात्काम इवाङ्गवान् नरपतिः कान्ताविलासोत्सवः ॥

यूपैश्चारुभिरुच्छ्रितैर्वसुमती पित्रा ममालङ्कृता
क्षात्रेणाजिमखाश्रयेण विधिना दीक्षाश्रितोऽहं स्थितः ।
यात्रां प्रत्यरिसंक्षयाय तरसा गच्छामि पूर्वां दिशं
ये चाज्ञावशवर्तिनो मम नृपाः संस्थापयिष्यामि तान् ॥

इत्येवं जननीमपेतकलुषां राजा प्रणम्योचिवान्
नाम्बानृण्यमहं तपोभिरमलैः शक्नोमि यातुं पितुः ।
किन्त्वाप्तेन यथावदस्त्रविधिना तत्पादसंसेवया
यास्यामीति ततोऽम्बयातिमुदया दत्ताभ्यनुज्ञो नृपः ॥

Changu Nārāyaṇa Temple Inscription; *NIGC*, 3-4

A.D. 706

शिवस्तुतिः

(Homage to Śiva)

जयति जितमनोजो ब्रह्मविष्ण्वादिदेव-
प्रणतपदयुगाब्जो निष्कलोऽप्यष्टमूर्तिः ।
त्रिभुवनहितहेतुः सर्वसङ्कल्पहारी
परपुरुष इह श्रीशानदेवोऽयमाद्यः ॥

My-son Stelae Inscription of Vikrāntavarman II; Śaka 653, *Champa*, 39

A.D. 731

शिवस्तुतिः

(Homage to Śiva)

गङ्गोत्तुङ्गतरङ्गरञ्जितजटामौलीन्दुचूडामणि-
भास्वत्पूतविभूतिदेहविकसन्नागेन्द्रहारद्युतिः ।
श्रीमत्स्वाञ्जलिकोशकोमलकरैर्देवैस्तु यः स्तूयते
स श्रेयो भवतां भवो भवतमस्सूर्यो ददात्वद्भुतम् ।।

भक्तिप्रह्वैर्मुनीन्द्रैरभिनुतमसकृत् स्वर्गनिर्वाणहेतो-
र्देवैर्लेखर्षभाद्यैरवनतमकुटैश्चुम्बितं षट्पदाभैः ।
अङ्गुल्याताम्रपत्रं नखकिरणलसत्केसरारञ्जितान्तं
देयात् शं शाश्वतं वस्त्रिनयनचरणानिन्दिताम्भोजयुग्म ।।

ऐश्वर्यातिशयोद्भवात् सुमहतामप्यद्भुतानां निधि-
स्त्यागैकरतस्तनोति सततं यो विस्मयं योगिनाम् ।
योष्टाभिस्तनुभिर्जगत्करुणया पुष्णाति न स्वार्थतो
भूतेशः शशिखण्डभूषितजटः स त्र्यम्बकः पातु वः ।।

बिभ्रद्धेमवपुः स्वदोषदहनज्वाला इवोद्यज्जटा
वेदस्तम्भसुबद्धलोकसमयो धर्मार्थकामोद्भवः ।
देवैर्वन्दितपादपङ्कजयुगो योगीश्वरो योगिनां
मान्यो लोकगुरुर्ददातु भवतां सिद्धिं स्वयम्भूर्विभुः ।।

विष्णुस्तुतिः

(Homage to Viṣṇu)

नागेन्द्रोत्फणरत्नभित्तिपतितां दृष्ट्वात्मबिम्बश्रियं
सभ्रूभङ्गकटाक्षया कुपितया दूरं श्रिया वीक्षितः ।
यो योगारुणलोचनोत्पलदलः शेतेऽम्बुशय्यातले
त्राणार्थं त्रिदशैः स्तुतः स भवतां देयात् श्रियं श्रीपतिः ।।

नृपसन्नवर्णनम्

(Description of King Sanna)

तस्मिन्द्वीपे यवाख्ये पुरुषपदमहालक्ष्मभूते प्रशस्ते
राजोग्रोदग्रजन्मा प्रथितपृथुयशाः सामदानेन सम्यक्।
शास्ता सर्वप्रजानां जनक इव शिशोर्जन्मतो वत्सलत्वात्
सन्नाख्यः सन्नतारिर्मनुरिव सुचिरं पाति धर्मेण पृथ्वीम् ॥

नृपसञ्जयवर्णनम्

(Description of King Sañjaya)

श्रीमान् यो माननीयो बुधजननिकरैः शास्त्रसूक्ष्मार्थवेदी
राजा शौर्यादिगुण्यो रघुरिव विजितानेकसामन्तचक्रः।
राजा श्रीसञ्जयाख्यो रविरिव यशसा दिग्विदिक्ख्यातलक्ष्मीः
सूनुः सन्नाहनाम्नः स्वसुर···न्यायतः शास्ति राज्यम् ॥

यस्मिञ्छासति सागरोर्मिरशनां शैलस्तनीं मेदिनीं
शेते राजपथे जनो न चकितश्चौरैर्न चान्यैर्भयैः।
कीर्त्याढ्यैरलमर्जिताश्च सततं धर्मार्थकामा नरै-
र्नूनं रोदिति रोदिति स कलिर्नास्त्यंशशेषो यतः॥

Changal (in mid-Java) Stone Inscription of King Sañjaya
द्विवेदी अभिनन्दनग्रंथ, pp. 225-7
A.D. 732

द्वैपायनस्तोत्रात्

(From the Dvaipāyana Stotra)

प्रत्याधारस्थितत्वात् पृथगपि न पृथक् तत्स्वरूपाविशेषात्
नित्यं धर्मैरयोगात् पुनरपि न तथा सर्वकालप्रतीतेः।

नांशोत्पादाद्ययोगात् स्थितमपि जगतः सर्वगं व्यापिभावात्
चैतन्यं रूपपक्षस्थितमपि कथयेत् को नु लोके त्वदन्यः ।।

निरंहसं दुरितभिदं विवेकिनं
तमोमुषं शमितभवं विपश्चितम् ।
गिरां पतिं सुधियमसङ्गचेतसं
मयोदितं वचनमुपैतु ते सदा ।।

शमितभवभयेन क्षायिणाज्ञानराशेः
स्वयमुपहितधाम्ना वेद्यपारंगतेन ।
जगदपरजसेदं तत्त्वया सर्वमाराद्
वियदिव तिमिराणां क्षायकेणाविभाति ।।

गुणपुरुषविवेकज्ञानसंभिन्नजन्मा
व्यतियुतविषयाणां त्वं गिरां संविवेकी ।
जगति घनविरूढव्यापिसम्मोहभेदी
च्युतजगदनिरोधः खे शशीव चकास्सि ।।

अनुपरमस्य

Harigāon Inscription; *NIGC*, 17
A.D. 747

शिवस्तुतिः

(Homage to Śiva)

श्रियं चिरं वः शिशिरांशुशेखरः
शिवः श्रितार्त्तिप्रतिबन्धकारणम् ।
तनोतु सौवर्णकपर्दसुन्दरः
कुदर्पकन्दर्पमदप्रमर्दनः ।।

पाण्डचराजवंशवर्णनम्

(Description of the Pāṇḍya Dynasty)

विश्वम्भराभरश्रान्तशेषविश्रामकारणम् ।
कल्पान्तं भुवि स्थेयादन्वयः पाण्डचभूभृताम् ।।

अस्तम्भयत्क्षितिधरं प्रविजृम्भमाण-
मम्भः समस्तमपिबज्जलधेश्च यः सः ।
कुम्भोद्भवो भवति यस्य मुनिः पुरोधाः
स श्रीनिधिर्जयति पाण्डचनरेन्द्रवंशः ।।

नृपपाण्डचवर्णनम्

(Description of King Pāṇḍya)

अस्थादप्रतिमप्रभावमहितः पाण्डचाभिधानो निधे-
र्वारां द्वारि महीपतिस्त्रिभुवने लीनेऽपि कल्पक्षयात् ।
धात्रा सृष्टवता पुनः स जगतां रक्षार्थमभ्यर्थित-
स्तेजस्वी तनयत्वमेत्य शशिनो नाम्ना बुधाख्योभवत् ।।

Velvikudi Grant of Neduñjadaiyan; *EI*, XVII, p. 298
± A.D. 769-70

तारास्तुतिः

(Homage to Tārā)

नमो भगवत्यै तारायै—
या तारयत्यमितदुःखभवाब्धिमग्नं
लोकं विलोक्य विधिवत्त्रिविधैरुपायैः ।
सा वः सुरेन्द्रनरलोकविभूतिसारं
तारा दिशत्वभिमतं जगदेकतारा ।।

पुण्यफलसंकल्पः

(Dedication)

अनेन पुण्येन विहारजेन प्रतीत्य जातार्थविभागविज्ञाः।
भवन्तु सर्वे विभवोपपन्ना जना जिनानामनुशासनज्ञाः॥

करियानपणंकरणः श्रीमान् अभियाचतेऽत्र भाविनृपान्।
भूयो भूयो विधिवद् विहारपरिपालनार्थमिति॥

Kalassan (in mid-Java) Stone Inscription
द्विवेदी अभिनन्दनग्रंथ, pp. 231, 238
778 A.D.

शिवस्तुतिः

(Homage to Śiva)

सर्गस्थितिलयहेतो-
र्विश्वस्य ब्रह्मविष्णुरुद्राणाम्।
मूर्तित्रयं प्रदधते
संसारभिदे नमो विभवे॥

नृपप्रदीप्तवर्मवर्णनम्

(Description of King Pradīptavarman)

सूनुरभूत्तस्य महान्
भूपालः श्रीप्रदीप्तवर्मेति।
दर्पान्धशत्रुपृतना-
पतङ्गपटलीप्रदीप्ताग्निः॥

नृपेश्वरवर्मवर्णनम्

(Description of King Īśvaravarman)

श्रीश्वरवर्मेति सुत-
स्तस्याभूद्भूपतिः प्रदानेन।
ऐश्वर्यं यः कृतवान्
भव इव निचयेन नार्थिनाम्॥

नृपयज्ञवर्मवर्णनम्

(Description of King Yajñavarman)

श्रीयज्ञवर्मनामा
तदङ्गजोऽभून्महीपतिर्येन।
यज्ञाज्यधूमजलदै-
र्नित्योत्केकाः कृताः शिखिनः॥

राजकुमारचन्द्रगुप्तपत्नीश्वरावर्णनम्

(Description of Prince Candragupta's wife Īśvarā)

तस्यास्तनया साध्वी
सावित्रीवेश्वरेति नाम्नासीत्।
जालन्धरनृपसूनो-
र्जाया श्रीचन्द्रगुप्तस्य॥

भर्तरि गतवति नाकं
करिणः स्कन्धाद् भवास्पदमिदं सा।
तत्पुण्यायाकारय-
दाचार्यानुगतसत्येन॥

यावन्महीमहीधर-
जलनिधयो यावदिन्दुरवितारा:।
तावदिदमस्तु कीर्ति-
स्थानं श्रीचन्द्रगुप्तस्य ।।

भट्टवसुदेवस्य

Lakkhā Maṇḍal Praśasti; *EI*, I, pp. 12-14
± A.D. 800

नृपेन्द्रवर्मवर्णनम्

(Description of King Indravarman)

श्रीमान् राजेन्द्रवर्मा वरजनमहितो यज्ञरत्नप्रमुख्य:
ख्यातस्तेषां प्रभावैर्मनुरिव जगतो रक्षणे क्षेमयुक्त:।
ब्रह्मक्षत्रप्रधानो जगति दिवि यथा यज्ञभागैर्महेन्द्रो
राज्ये वंशप्रतीत: सरुचिरिव शशी निर्मलाकाशदेशे ।।

स जगति विक्रमतया भुजद्वयेनोद्वहन्निव धरणीं, सकलचम्पाधिराज्यवसुमतीतलपतितशतमख इव, धनञ्जय इवाप्रतिहतपराक्रमोऽपि हरिरिव विजिताशेषरिपुवृन्दवृद्ध:, सुरासुरगुरुचरणद्वयारविन्दजनितसुस्फीतदेशातिशयविक्रमस्तु भुवि देवराजसदृश: पूर्वजन्मानवरतमखकुशलतप:फलतया धनद इव धनत्यागातिशयेन राजलक्ष्म्यालिङ्गितमृदुतरशरीरप्रदेश:

Yanj Tikuh Stelae Inscription of Indravarman I; *Champa*, p. 45
Śaka 721
A.D. 799

शिवस्तुति:

(Homage to Śiva)

भोगीश्वरकृतपरिकर-
मीक्षणजितकामरूपमविमुक्तम् ।

परमेश्वरस्य रूपं
निजभूतिविभूषितं जयति ।।

धर्मस्तुतिः
(Homage to Dharma)

जगति जगदेकबन्धु-
र्लोकद्वितयस्य सम्पदो हेतुः ।
परहितमूर्तिरदृष्टः
फलानुमेयस्थितिर्धर्मः ।।

नृपनरकवर्णनम्
(Description of King Naraka)

धात्रीमुच्चिक्षिप्सो-
रम्बुनिधेः कपटकोलरूपस्य ।
चक्रभृतः सूनुरभूत्
पार्थिववृन्दारको नरकः ।।

नृपभास्करवर्मवर्णनम्
(Description of King Bhāskaravarman)

सैव श्यामादेवी
तस्यानुजमकलितोदयमसूत ।
श्रीभास्करवर्माणं
भास्करमिव तेजसां निलयम् ।।

एकोऽपि हि यः पुंसां
हृदयेष्वभिलक्षितः स्वभावेन ।
शुद्धेषु दर्पणेष्विव
बहुसुषमं सम्मुखीनेषु ।।

यस्याविहतमतनुभि-
स्तेजोभिर्लक्ष्म नृपतिभवनेषु ।
उदपात्रेष्विव भूरिषु
विलोक्यते भास्करस्येव ।।

अव्यालः स्वारोहः
कल्पद्रुमवत् समृद्धिभूरिफलः ।
छायोपाश्रितजनता-
परिवेष्टितपादमूलो यः ।।

दिवाकरस्य

Bhāskaravarman's Charter; *KS*, pp. II ff.
±A.D. 800

नृपपरमेश्वरवर्मवर्णनम्

(Description of King Parameśvaravarman)

भरत इव सर्वदमनः सगर इव कृतासमञ्जसत्यागः ।
कर्ण इव पुष्कलाङ्गो यः प्रियकाव्यो ययातिरिव ।।

अनुपनतानां राज्ञां यस्याज्ञा भवति सर्वदा पीडा ।
सैव सुहृदां प्रयच्छति मुखशोभां कर्णपूरतया ।।

चतुरः कलाविलासे नियतं चण्डो भवत्यनङ्गस्य ।
मुक्तागुणस्तु हृदये मुक्तागुण एव वनितानाम् ।।

अगणितनरहयकरिकुलविमर्दजनितेन रेणुतुहिनेन ।
आरोपितशशिमण्डलसादृश्यसहस्रकरबिम्बे ।।

पटहरवगर्जितोग्रे विकोशनिस्त्रिंशविद्युदाभोगे ।
प्रचरितकुञ्जरजलदे विकालवर्षावतार इव ।।

Kūram Plates of Parameśvaravarman I; *EI*, XVII, p. 340
± A.D. 800

हरिहरस्तुतिः

(Homage to Harihara)

पत्योर्नौ पश्य हे श्रीर्युगलममिथुनं शूलभृच्छार्ङ्गपाण्यो-
रेकैकस्यात्र कितन्न सुकरमनयोस्तौ यदेकत्र पृक्तौ ।
मूर्तिं त्यक्त्वेव नूनं सखि मदनरिपोरेवमुक्ता भवान्या
यो दृष्टो जातु तस्मै सततमिह नमोऽस्त्वर्धशौरीश्वराय ।।

. . . .

भिन्ने पुंसां जगति च तथा देवताभक्तिभावे
पक्षग्राहभ्रमितमनसां पक्षविच्छित्तिहेतोः ।
इत्यर्धाभ्यां समुपरचितं यन्मुरारीश्वराभ्या-
मेकं रूपं शरदिजघनश्यामगौरं तदव्यात् ।।

Gancha Nani Inscription of Vārtta; *NIGC*, p. 28
A.D. 809

विष्णुस्तुतिः

(Homage to Viṣṇu)

त्रिभुवनभवनस्तम्भो नभस्तलाम्भोधिसेतुरघदहनः ।
ब्रह्माण्डमण्डलाम्बुजदण्डरुचिर्जयति हरिचरणः ।।

अहिमकरचक्रकुवलयविलसत्कमलालयः स दानवकायः।
जलनिधिरिव हरिरवतात् पुराणपुरुषोऽपि यः सदा नवकायः ।।

नृपकर्कराजवर्णनम्

(Description of King Karkarāja)

दुर्वारवैरिवरवारणकुम्भमुक्त-
मुक्ताफलप्रकरनिर्मलदन्तमाला।
नागावलोकनृपवेश्मनि विप्रकीर्णे
यस्योद्धतं प्रहसतीव कृपाणपाली ।।

शकलीकृतसर्वाङ्गा नानाभरणभूषिताः।
दृश्यन्ते रिपवो यस्य नानाभरणभूषिताः ।।

यस्योत्पलच्छविमुषा स्वजलोन्नतेन
खड्गेन तुङ्गतरभूमिभृतां शिरस्सु।
धारानिपातजनितैरसृजां प्रवाहै-
र्युद्धे महाप्रलयकालघनप्रतीतिः ।।

हर्षस्य

Pathārī Pillar Inscription of Parabala; *EI*, IX, pp. 252-3
A.D. 861

वाइल्लभट्टसुताल्लवर्णनम्

(Description of Alla son of Vāillabhaṭṭa)

अवलोक्य वक्त्रकमलं व्याख्यानविधौ न दानविषयेषु।
संग्रामस्य न योऽभूत् पराङ्मुखः परकलत्रस्य ।।

स्थैर्यं वचसि न रोषे स्पृष्टो विजयैर्न जातु कलिकलुषैः।
यस्याभवदालस्यं पापेषु न राजकार्येषु ॥

धर्मार्जने च लोभो न कदाचित्परधनेषु विविधेषु।
यस्य त्वविवेकित्वं मित्रेषु न बुद्धिविभवेषु ॥

दारिद्रं हरतार्थिनो रिपुजनाल्लक्ष्मीं मनो योषितो
रूपं पञ्चशरादगाधपयसो गाम्भीर्यमम्भोनिधेः।
चित्रं येन विचारचारुमनसामाचारमातन्वता
सर्वत्रैव जनापवादरहितं चौर्यं प्रकाशीकृतम् ॥

कुर्वीत यदि विधाता कर्णानामपि सहस्रमहिपस्य।
श्रुत्वाथ तद्गुणौघान् वदनशतैः शक्नुयाद् वक्तुम् ॥

Inscription of the Vāillabhaṭṭasvāmin Temple at Gwalior; V.S. 923; *EI*, I, p. 156
A.D. 875

नृपेन्द्रवर्मवर्णनम्

(Description of King Indravarman)

द्वयं कथं नु संलक्ष्य-
मिति धात्रा यदाननम्।
विधाय भेदबुद्ध्यर्थं
मृगाङ्को नूनमङ्कितः ॥

अध्यास्ते यस्य हृदयं
नैव कामो निरन्तरम्।
तत्संनिहितचन्द्रार्ध-
चूडामणिभयादिव ॥

क्षीरोदसारमथना-
दाहरन्तं श्रियं हरिम् ।
जहासेव प्रभूतश्रीर्-
यो भूभृन्मथनेन तु ।।

. . . .

न्यस्तं ज्ञानधनं यस्य
मनः कोशे सरस्वती ।
नित्यं रक्षितुकामेव
मुखद्वारे स्थिताभवत् ।।

कीर्तिः

(Fame)

ब्रह्माण्डादिव निर्गन्तुं
शङ्के वर्त्माभिकाङ्क्षिणी ।
तदनाप्तवती यस्य
कीर्तिर्भ्रमति सर्वतः ।।

IC, I, pp. 20-1
A.D. 879

आचार्यशिवसोमवर्णनम्

(Description of Ācārya Śivasoma)

शास्त्रार्णवं पिबन् कृत्स्नं
स्तम्भयन् रागभूभृतम् ।
यः सदा दक्षिणाचारः
कुम्भयोनिरिवापरः ।।

फलनिःस्पृहचित्तोऽपि
फलसञ्चितवृत्तिमान् ।
विद्यया यः सुपीनोऽपि
तपसा कृशताङ्गतः ॥

. . . .

यस्याङ्घ्रियुगलाम्भोज-
रजः स्पृष्ट्वैव मानुषाः ।
सर्वतीर्थाभिषेकाणाम्
अवाप्तं मेनिरे फलम् ॥

CI, I, pp. 39-40
± A.D. 887

राज्ञीसोमप्रभावर्णनम्

(Description of Queen Somaprabhā)

अपूर्वमिन्दुं प्रविधाय वेधाः
सदास्फुरत्कान्ति कलङ्कमुक्तम् ।
सम्पूर्णबिम्बं वदनं यदीय-
मभूत्तरां कण्टकिताङ्गयष्टिः ॥

ACS, p. 156
± A.D. 900

नृपशङ्करगणवर्णनम्

(Description of King Śaṅkaragaṇa)

श्रीशङ्करगणस्तस्मादभूद्भूमीश्वरो महान् ।
यत्पादद्वन्द्वमद्वन्द्वं द्विषद्भिरपि सेवितम् ॥

संख्येऽसंख्यविपक्षपक्षदलनव्यासङ्गि खड्गव्रतं
यस्यासीद् दृढसाहसस्य सततन्दानं जनानन्दकृत् ।
रूपेणाप्रतिमो मनोभवभवं दर्पं जहारोद्धतं
यः सर्वत्र च सर्वकालमवनीनाथः स्तुतः कोविदैः ।।

नृपयुवराजदेववर्णनम्

(Description of King Yuvarājājadeva)

तस्य श्रीयुवराजदेवनृपतिर्भ्राता कनीयानभूद्
भूपैर्यच्चरणारविन्दपतितैर्भृङ्गैरिवावस्थितम् ।
यः सत्यव्रतसत्त्वसूक्तिवसतिः श्रीविक्रमैकाश्रयः
प्रायस्तस्य न सज्जनोपि सकलान् वक्तुं गुणान् शक्ष्यति ।।

सज्जनस्य

Bilhari Chedi Inscription; *EI*, I, pp. 260-1
± A.D. 900

शिवस्तुतिः

(Homage to Śiva)

पायाद्वः स समस्तमङ्गलनिधिः शम्भोर्जटाजूटको
यस्मिँल्लोललसद्द्युमण्डलगलन्मन्दाकिनीवारिभिः ।
गाढग्रन्थिनिपीडितोरगपतिप्रस्फारफुल्लत्फणा-
भीमव्यावृतवक्त्रमारुतधृतैः श्वेतातपत्रायितम् ।।

अपि च—

अव्याद्वश्चन्द्रचूडस्य लोचनार्चिष्यतः शिखा ।
मित्रमेष स्मरस्येति दग्धुं विधुमिवोद्गता ।।

कविप्रश्रयः

(Poet's Humility)

वंशेऽत्र सोमसंभूतौ
    वाचं निक्षिपता मया ।
हन्त हस्तैरुपक्रान्ता
    मोहेन वियतो मितिः ॥

वाचामुज्ज्वलिमापि नास्ति यदि मे तत्कीर्त्यमानोन्नते-
    रस्मादेव महीयसः शशभृतो वंशात् स संपत्स्यते ।
यद्वा पश्य निसर्गकालिमभुवोऽप्याशेभदानच्छटाः
    क्षीरोदन्वति किन्न सङ्गतिभृतस्तच्छायतां बिभ्रति ॥

नृपार्जुनवर्णनम्

(Description of King Arjuna)

अस्मिंश्च वन्द्यतमतां गमिते बुधाद्यै-
    राद्यैर्नृपैर्नृपतिरर्जुन इत्युदारः ।
आसीद् द्विषद्विपिनकर्तनकीर्तनीय-
    कीर्तिच्छटाच्छुरितदीर्घदिगन्तरालः ॥

नृपकोकल्लदेववर्णनम्

(Description of King Kokalladeva)

वेलावनप्रणयिसैन्यभरे च यत्र
    मज्जद्भिराकुलकुलाद्रिनिभैरिभेन्द्रैः ।
संभ्रान्तमन्दरगिरेः समयस्य तस्य
    कालाद्बहोः स्मरणमाप निधिर्जलानाम् ॥

जित्वा कृत्स्नां येन पृथ्वीमपूर्वं
कीर्तिस्तम्भद्वन्द्वमारोप्यते स्म ।
कौम्भोद्भूव्यां दिश्यसौ कृष्णराजः
कौबेर्यां च श्रीनिधिर्भोजदेवः ।।

नृपमुग्धतुङ्गवर्णनम्

(Description of King Mugdhatuṅga)

शय्या संग्रामलक्ष्म्याः परबलपरिघः पल्लवः कोपवल्ल्याः
प्रेयो दर्पस्य मित्रं सुचरितसलिलस्येन्द्रनीलप्रणालः ।
शाखा शौर्यद्रुमस्य प्रसरणसरणिः शाश्वती साहसाना-
मासीद् यस्यासिरेव प्रधनपरिकरारम्भिणः प्रीतिपात्रम् ।।

उपविपिनभुवो निधेर्जलाना-
मधिवसता कटकेन यस्य यातुः ।
अवचयविचलद्वधूकराग्र-
द्विगुणितविद्रुमपल्लवा बभूवुः ।।

नृपकेयूरवर्षवर्णनम्

(Description of King Keyūravarṣa)

गौडीगाढमनोमनोरथकरः कर्णाटकान्ताकुच-
क्रीडाशैलतटीविहारहरिणो लाटीललाटाङ्कदः ।
काश्मीरीविहितस्मरव्यतिकरस्तस्मात्कलिङ्गाङ्गना-
सद्गानव्यसनी स नीतिनयनः केयूरवर्षोभवत् ।।

देवो रुद्रावतारस्त्रिभुवनभवनोत्तम्भनो देव एव
त्यागी देवः प्रमाद्यन्नृपतिनियमने नैगडं दाम देवः।
इत्थं सद्वन्दिवृन्दैरविरलविलसच्चाटुवादं वदद्भि-
रस्यास्थानस्थितानामसममसुहृदां विव्यथे चित्तवृत्तिः।।

श्रीनिवासस्य

Bilhari Inscription of Yuvarājadeva II; *CII*, IV, pp. 209-11
± A.D 925

विष्णुस्तुतिः

(Homage of Viṣṇu)

अनन्तनागाधिपभोगभासुरे
जलाशये शान्ततमं मनोहरम्।
मुरारिरूपं यदशेत देहिनां
शिवाय तद्वो विदधातु मङ्गलम्।।

Kathmandu Inscription; *NIGC*, p. 81
A.D. 944

नृपनरेन्द्रदेववर्णनम्

(Description of King Narendradeva)

शौर्यं नीतिगुणैर्गुणैरकलितैरात्मानमुद्भासिभिः
शक्त्या बाहुबलं मतिं स्मृतिमतीं शास्त्रागमैर्भूरिभिः।
मर्यादाः स्थितिभिर्दिशोऽपि यशसा राज्यश्रिया मेदिनी-
र्जात्या लिच्छविराजवंशमनघं योऽलंकरोत्युच्चकैः।।

Kathmandu Inscription; *NIGC*, p. 88
A.D. 949

नृपनरेन्द्रदेववर्णनम्

(Description of King Narendradeva)

कैलासकूटभवनाद्भुवनप्रकाशा-
ज्ज्योत्स्नावमृष्टहिमवच्छिखराग्रदीप्तेः ।
आसागरप्रसृतशुभ्रयशोध्वजानां
राज्ञां कुलाम्बरशशी भुवि लिच्छवीनाम् ।।

वल्गद्वीरपदातिकुन्तविशिखप्रोताश्वनागाकुले
शक्त्यान्यास्पृहणीयया रणमुखे संज्ञावशेषान् द्विषः ।
कृत्वा लोकहितोद्यमप्रभवया कीर्त्या दिशो भासय-
न्नन्योन्याविहतान् प्रजासु विदधद्धर्मार्थकामान् मुदा ।।

Pātan Inscription; *NIGC*, p. 90
A.D. 949

शिवस्तुतिः

(Homage to Śiva)

नमो नम्रनभश्चारि-
चक्रलग्नाङ्घ्रिरोचिषे ।
द्विसप्तजगदालम्ब-
ध्रुवायार्धेन्दुधारिणे ।।

जयन्ति गङ्गाजिह्माङ्गा-
स्तरङ्गा हरमूर्धनि ।
वदान्योदन्वता दत्ता
बालचन्द्रार्बुदा इव ।।

सरस्वतीस्तुतिः

(Homage to Sarasvatī)

भारती भाति गौराङ्ग-
यष्टिरापाण्डुरस्तनी ।
गङ्गेव कञ्जकिञ्जल्क-
पिञ्जरोद्गतसैकता ॥

IC, I, p. 62
± A.D. 950

विष्णुस्तुतिः

(Homage to Viṣṇu)

पारे सत्त्वरजस्तमस्कमपि यो नित्यं निविष्टः पदे
त्रैगुण्येन चतुर्विधेन विविधाभिव्यक्तिराविर्भवन् ।
विश्वाकारधरो निरस्तसकलाकारोऽपि देदीप्यते
वन्दन्तां भगवन्तमादिपुरूषं तं वासुदेवं विभुम् ॥

नृपराजेन्द्रवर्मवर्णनम्

(Description of King Rājendravarman)

धनुर्धनुर्वेदविदां वरोऽपि
विधूय मौर्वीरवपूरिताशः ।
प्रयोगतोऽभिज्वलितं विपश्चिद्
यश्चापशब्दं न चकार कंचित् ॥

यस्याकलङ्काः सकलाः कलाली-
रलंकरिष्णोः किल बालभावे ।
चन्द्रस्तुलार्थीव तुलामलब्ध्वा-
धनापि वृद्धौ पुनरेति बाल्यम् ॥

मूर्धाभिषिक्तः सुकुमारभावो
दृप्तद्विषत्तारकदारिशक्तिः ।
निनाय कीर्णां दिशि कम्बुसेनां
यो देवसेनामिव कार्त्तिकेयः ।।

नौकावली यस्य रराज याने
पूर्णा पयोधौ सितसीतसार्था ।
गङ्गाम्बुवेगेन विसारितान्त-
र्नीता समन्तादिव हंसमाला ।।

जलधिललितवस्त्रां तज्जलोन्नुन्नरत्न-
प्रकररचितचञ्चद्वीचिकाञ्चीकलापाम् ।
पृथुलगिरिनितम्बां निर्मलच्छत्रवक्त्रां
स्त्रियमिव रमयां यः क्ष्मां चकारानुरक्ताम् ।।

अभिषेकाम्भसा यस्य
सिक्ता कतिपयापि भूः ।
सार्वभौमस्य सन्तापं
सर्वभूमेरपाहरत् ।।

विवृद्धा वाहिनी यस्य
प्रावृषीव शरद्यपि ।
बभञ्ज विभ्रमेणैव
भूभृतो मार्गरोधिनः ।।

क्षत्रनक्षत्रनक्षत्र-
नाथान् यस्तेजसा जयन् ।
रणरङ्गाम्बरारूढो
रेजे रविरिवोदितः ।।

धनुर्ज्याघातझङ्कारा
मुक्ता येन शिलीमुखाः ।
वैरिवक्त्रारविन्देषु
रक्तमध्वपिबन् रणे ।।

रक्ताक्तासिलता यस्य
कृत्तैः श्लिष्टा भुजैर्द्विषाम् ।
ज्वालेव सर्पसत्त्राग्नेः
पतत्सर्पार्बुदा बभौ ।।

पुंवत्प्रगल्भा कान्तापि
यमनैषीद्रणक्रिया ।
लक्ष्मीमजमनन्योक्तां
सुनन्देन्दुमतीमिव ।।

वनं रिपुपुरीकुर्व-
न्वनीकुर्वन् रिपोः पुरम् ।
यः पदार्थविपर्यास-
मितिशब्द इवाकरोत् ।।

IC, I, pp. 77, 80, 91, 92, 93, 94, 96
± A.D. 950

नृपयशोवर्मवर्णनम्

(Description of King Yaśovarman)

गौडक्रीडालतासिस्तुलितखसबलः कोशलः कोशलानां
नश्यत्कश्मीरवीरः शिथिलितमिथिलः कालवन्मालवानाम् ।
सीदत्सावद्यचेदिः कुरुतरुषु मरुत् संज्वरो गूर्जराणां
तस्मात्तस्यां स जज्ञे नृपकुलतिलकः श्रीयशोवर्मराजः ।।

स दाता राधेयः स च शुचिवचाः पाण्डुतनयः
स शूरः पार्थोऽपि प्रथितमहिमानः किमपि ते।
व्यतीताः किं ब्रूमो यदि पुनरिह स्युः स्वचरिते
ह्रिया नम्रीकुर्युर्वदनमवलोक्यैनमधुना ॥

त्रस्तत्रातरि तत्र भूभृति नृणां क्लेशाय शस्त्रग्रहः
कामं दातरि सिद्धकेलिसुमनस्तल्पाय कल्पद्रुमाः।
वित्तेशः परमार्थवृद्धिविधुरस्वान्तो विलासी स चेद्
आस्ये तस्य सतीन्दुरुत्पलवनप्रीत्यै दृशामुत्सवे ॥

विष्णुमन्दिरवर्णनम्

(Description of a Viṣṇu Temple)

तेनैतच्चारु चामीकरकलसलसद्व्योम धाम व्यधायि
भ्राजिष्णु प्रांशुवंशध्वजपटपटलान्दोलिताम्भोजवृन्दम्।
दैत्यारातेस्तुषारक्षितिधरशिखरस्पर्धि वर्धिष्णुरागा
दृष्टे यात्रासु यत्र त्रिदिववसतयो विस्मयन्ते समेताः॥

नृपधङ्गवर्णनम्

(Description of King Dhaṅga)

आकालञ्जरम् आ च मालवनदीतीरस्थितेर्भास्वतः
कालिन्दीसरितस्तटादित इतोप्या चेदिदेशावधेः।
आ तस्मादपि विस्मयैकनिलयाद्गोपाभिधानाद्गिरे-
र्यः शास्ति क्षितिमायतोर्जितभुजव्यापारलीलार्जिताम् ॥

यस्त्यागविक्रमविवेककलाविलास-
प्रज्ञाप्रतापविभवप्रभवश्चरित्रात्।
चक्रे कृती सुमनसां मनसामकस्माद्
अस्माद् अकालकलिकालविरामशङ्काम् ॥

कविमाधववर्णनम्

(Description of Poet Mādhava)

शब्दानुशासनविदा पितृमान् व्यधत्त
देद्देन माधवकविः स इमां प्रशस्तिम् ।
यस्यामलं कविशयः कृतिनः कथासु
रोमाञ्चकञ्चुकजुषः परिकीर्तयन्ति ।।

करणिकजद्धवर्णनम्

(Description of Scribe Jaddha)

संस्कृतभाषाविदुषा जयगुणपुत्रेण कौतुकाल्लिखिता ।
रुचिराक्षरा प्रशस्तिः करणिकजद्धेन गौडेन ।।

माधवस्य

Khajurāho Inscription of Yaśovarman; V.S. 1011; *EI*, I, pp. 126-7, 129
A.D. 954

मन्त्रिभाकमिश्रवर्णनम्

(Description of Minister Bhākamiśra)

वंशाद्भरद्वाजमुनेरनूनाद्
गुणानतो धर्म इवापरोऽभूत् ।
श्रीभाकमिश्रः क्षितिपप्रणम्यः
शश्वत्कृतार्थीकृतमार्गणौघः ।।

यदनवधिवितानप्रज्वलज्जातवेद-
स्तततरखरतापोत्तप्तगात्री धरित्री ।
दिगिभभुजगराजानन्तकूर्मैः समूहे
कलितदवथुपीडानष्टधैर्यैः कथंचित् ।।

यश्च—

अचीकरत्कुत्र न देववेश्मा-
न्यचीखनत्कुत्र न वा सरांसि।
अविव्यधत्कुत्र न कूपवापी-
ररूरुपन्नाम्रवणानि कुत्र॥

अवाप्य यं श्रीयुवराजदेवो
धराधरं प्राच्यमिवांशुमाली।
प्रापोन्नतिं व्यस्तसमस्तदोषां
मन्त्रिप्रधानं कुलगोत्रचारुम्॥

भट्टसोमेश्वरवर्णनम्

(Description of Bhaṭṭa Someśvara)

एका कला मूर्ध्नि शशाङ्कमौले-
रिन्दोः कलाः पञ्चदश प्रसिद्धाः।
श्रीभट्टसोमेश्वरदीक्षितस्य
कल्याः कलाः कीर्तयितुं कृती कः॥

मेरुः सञ्चितकाञ्चनैकनिचयः पुष्यत्तुषारोत्करै-
रुद्भूतोद्धुरजाड्य एव हिमवान् रौद्रो गिरी स्फाटिकः।
अर्थिप्रत्तसमस्तहेमनिवहः प्रेद्धैकबोधावधिः
सौम्योऽसावुपमीयते कथमिव क्ष्माभृत्त्रयेणामुना॥

वातन्धमाधिरोहे भ्रश्यति दोलाभृति श्रमात् किञ्चित्।
श्रीमल्लक्ष्मणराजः स्कन्धमदाद् यस्य दोलायाम्॥

प्रासादोऽयमकारि तेन कृतिना देवस्य दैत्यद्रुहः
श्रीमच्चेदिनरेन्द्रमन्त्रितिलकेनाच्छादिताशामुखः।

यस्योच्चैः पवनाहतो ध्वजपटः प्रेङ्खन् वियद्‌गामिनां
संज्ञां व्याघुटने करोत्यविरतं रुद्धाध्वनोऽतिध्रुवम् ।।

Kārītalāi Inscription of Lakṣmaṇarāja II; *CII*, IV, pp. 188-90
± A.D. 965

शिवस्तुतिः

(Homage to Śiva)

फणिश्वासश्यामे स्वनदमरनद्यम्भसि च य-
ज्जटाजूटाम्भोदे नयनशिखिविद्युद्विलसति ।
तथा चूडाचन्द्रद्युतिनिकरधारेव ककुभं
कपालानां माला तुलयति स शर्वो विजयते ।।

हंसश्येनी हसितमहसां संहतिः शङ्करस्य
स्फारीभूता वदनमभितो नागचर्मावृतस्य ।
किञ्चित्कण्ठच्छविकलुषिता मेघनिर्यन्मृगाङ्क-
च्छायां स्वच्छां सपदि दधती सम्पदं वो ददातु ।।

चारीसंचरणप्रवीणचरणव्यापारणाघूर्णित-
क्षोणीकुण्डनभत्फणीश्वरफणं विद्राणदिग्वारणम् ।
दोर्दण्डभ्रमणादकाण्डचलितब्रह्माण्डखण्डं मुदे
भूयाद्वो निबिडक्वणड्डमरुकं चण्डीपतेस्ताण्डवम् ।।

आचार्यप्रशान्तशिववर्णनम्

(Description of Ācārya Praśāntaśiva)

प्रशान्तशिवचन्द्रमास्तदनु तस्य शिष्योभवत्
तमः प्रमथनोद्यमप्रकटितस्वरूपः शुचिः ।

बभार गुणिषु श्रियं कुमुदकल्पशैवेषु यः
समुज्ज्वलयशः प्रभाधवलिताखिलाशामुखः ।।

स शोणनदसङ्गमे भ्रमरशैलमूलेऽतुलं
प्रियालवनसंकुले फलमृणालकन्दाशनः ।
चकार विदितं जनैर्मुनिसखः प्रशान्ताश्रमं
स्वपादपदपङ्क्तिभिः पवितभूतलो यः कृती ।।

आचार्यप्रबोधशिववर्णनम्

(Description of Ācārya Prabodhaśiva)

प्रबोधशिवइत्यभूत्सकलशिष्यवर्गाग्रणीः
स तस्य मदनद्विषः परशुरामनामा यथा ।
यशःखचितदिङ्मुखो गुणिजनाय वित्तं ददद्
ऋणीकृतवसुन्धरो विजितशत्रुवर्गश्च यः ।।

उदग्रशिखितर्पणप्रगुणितैकपाणिः क्षणं
कुमार इव सर्वदा परिहृताङ्गनासङ्गमः ।
समुन्नतमहीभृति प्रकटितात्मशक्तिक्रमो
मनोभवरिपुप्रियो विहितदेवकार्यश्च यः ।।

घांसटस्य

Chandrehe Inscription of Prabodhaśiva; *CII*, IV, p. 200
A.D. 973

नृपविष्णुवर्धनवर्णनम्

(Description of King Viṣṇuvardhana)

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेन-पादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षण-

क्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलङ्करिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्धनोऽष्टादश वर्षाणि वेङ्गीदेशमपालयत् ।

± A.D. 975 अय्यनभट्टस्य

आचार्यहृदयशिववर्णनम्

(Description of Ācārya Hṛdayaśiva)

विद्यानां निलयेन येन सुधिया सत्यव्रतेनाधिकं
श्रीमन्माधुमतेयवंशवितता कीर्तिश्चिरं वर्द्धिता ।
किञ्च क्ष्मा क्षमयाम्बुदः समयता मर्यादयाम्बुनिधि-
र्वैराग्येण जितः स्मरः स भगवान् कस्यास्पदं न स्तुतेः ॥

किं स्तूयतेऽसौ मुनिपुङ्गवोऽथवा
श्रीचेदिचन्द्रो नृपतिः कृतादरः ।
सद्वृत्तदूतप्रहितैरुपायनैः
प्रदर्श्य भक्तिं विधिनानिनाय यम् ॥

नृपलक्ष्मणराजवर्णनम्

(Description of King Lakṣmaṇarāja II)

जित्वा कोसलनाथमोड्रनृपतेराप्तस्तु यः कालियो
रत्नस्वर्णमयः स येन विहितः सोमेश्वराभ्यर्चनम् ।
दत्त्वा यः करिवाजिशुभ्रवसनस्रक्चन्दनादीन् पुनः
संसारश्रमशान्तयेऽतिविनतस्तुष्टाव तुष्टः प्रभुम् ॥

असारं संसारं य इह मनुते कोऽपि नृपति-
स्त्वदंघ्रिध्यानतया विगलिततमस्तत्त्वनिरतः ।
न तस्य श्रीभूयो विकृतिकृतये जन्मविरहाद्
इति ध्यानाविष्टः शिवमहसि चित्तं विहितवान् ॥

नृपयुवराजदेववर्णनम्

(Description of King Yuvarājadeva II)

दंष्ट्राकोटिविपाटनोग्रवदनः क्रूरस्वरो भासुरो
नेत्रप्रान्तविकीर्णकोपरुधिरः पादप्रचारायुधः ।
येनाक्रम्य भुजेन भूमिपतिना लाङ्गूलबद्धक्रमो
दैत्यो व्याघ्रवपुर्हतोऽतिभयदः शस्त्रीभृता पाणिना ।।

कन्दर्पोऽभिनवः पुरन्ध्रिनयनप्रीतिप्रदोऽप्यन्यथा
यः कालः करवालकोटिविहतस्थूलेभकुम्भस्थलः ।
चित्रं यच्च सरस्वतीकृतरतिः श्रीकण्ठपूजापर-
श्चातुर्वर्ण्यविचारचारुचतुरो यच्चार्थिचिन्तामणिः ।।

सज्जनस्य

Bilhari Inscription of Yuvarājadeva II; *CII*, IV, pp. 213-214
± A.D. 975

शिवस्तुतिः

(Homage to Śiva)

भवति नृपतिवंशे जन्म पृथ्वी च भोग्या
श्रुतमुचितविचारश्चारुरूपप्रभावः ।
समरविजयसंपत्तस्य यो निष्प्रपञ्चं
चरणयुगलमूलं संश्रितः शङ्करस्य ।।

किमिह बहुभिरुक्तैर्नाथ सर्वस्य हेतु-
र्भवतु भवति नित्यं भक्तियोगो ममैकः ।
सकलसुखविशेषाद् यत्र पीयूषवर्षः
स्वयमनुभवगम्यो जायते त्वत्प्रसादात् ।।

युवराजदेवस्य

Bilhari Inscription of Yuvarājadeva II; *CII*, IV, pp. 214-215
± A.D. 975

आचार्याघोरशिववर्णनम्

(Description of Ācārya Aghoraśiva)

क्वचिद् भिक्षावृत्तिः क्वचिदपि च शाकाभ्यवहृतिः
क्वचिन्मूलाहारः क्वचिदपि च कन्दांश्च बुभुजे।
परं ज्योतिः शैवं विगलितरजस्कान्धतमसं
विचिन्वन्नो यातो विषविषयवेगस्य कलनाम् ।।

सीरुकस्य

Bilhari Inscription of Yuvarājadeva II; *CII*, IV, p. 215
± A.D. 975

आचार्यप्रशान्तशिववर्णनम्

(Descrtption of Ācārya Praśāntaśiva)

तस्यामलेन तपसा च विवर्धमान-
विद्याबलेन च समस्तजगत्प्रतीतः।
शिष्यः प्रकामकमनीयगुणैकधाम
श्रीमत्प्रशान्तशिवनाम मुनिर्बभूव ।।

आकृष्टा चिरसञ्चितेन तपसा यस्याङ्गसङ्गोत्सुका
लक्ष्मीर्भोगपराङ्मुखस्य सततं निःश्रेयसाकाङ्क्षया।
आज्ञां प्राप्य परोपकारकृतये तद्वल्लभानां सतां
स्थानेषु स्थिरतामवाप वनितेवात्यन्तसत्यव्रता ।।

त्यागं स्तम्भमिवावलम्ब्य विलसज्ज्ञानाम्बुसेकक्रिया-
मासाद्य प्रसरत्तपोबलकृतप्रत्यन्तरक्षाक्रमः।
इत्थं यस्य यशोमयः स ववृधे कालेन कल्पद्रुमो
येन व्याप्तमिदं प्रसह्य सकलं ब्रह्माण्डभाण्डोदरम् ।।

मधोः

Gurji Inscription of Kokalladeva II; *CII*, IV, p. 228
A.D. 990

बुद्धस्तुतिः

(Homage to the Buddha)

जयत्यसंजातविचित्रवासना-
गुणानुरागोज्ज्वलधीस्तपोनिधिः ।
तथागतः स्तम्भितमारसुन्दरी-
महोत्सवः सिद्धगणैरभिष्टुतः ।।

श्रेयः सत्त्वोपकृतिपरमं पश्यता येन तत्तत्
स्वप्राणैरप्यतिथिषु कृतं कीर्तितं यत्कथाभिः ।
योगैश्वर्याज्जगति सुबहून् संविधायावतारान्
कारुण्यैकप्रकृतिरभवद् यः सदासौ मुनीन्द्रः ।।

चन्द्रोत्पत्तिः

(Origin of the Moon)

तत्रात्रिस्त्रीणि दिव्यान्यकृत कृतधियामग्रणीर्वत्सराणा-
मव्याक्षेपात्सहस्राण्यनिमिषनयनोऽनुत्तराख्यं तपस्तत् ।
तद्वीर्यादार्यनेत्राद् अजनि दशदिशो भ्राजयञ्ज्योतिरोघः
सोऽयं विश्वाभिनन्द्यद्युतिरमृतनिधिश्चन्द्रमाः संप्रवृत्तः ।।

Kasia Inscription; *CII*, IV, pp. 377-8
± A.D. 1000

शिवस्तुतिः

(Homage to Śiva)

त्र्यक्षस्त्रय्यव्ययात्मा त्रिसमयसदृशस्त्रिप्रतीतस्त्रिलोकी-
त्राता त्रेतादिहेतुस्त्रिगुणमयतया त्र्याधिभिर्वर्णितोऽलम् ।

त्रिस्रोतोधौतमूर्धा त्रिपुरजिदजितो निर्विबन्धत्रिवर्गो
यस्योत्तुङ्गस्त्रिशूलस्त्रिदशपतिनुतस्त्र्य—–त्रोटनो नः ।।

नृपवसन्तदेववर्णनम्

(Description of King Vasantadeva)

वसन्त इव लोकस्य
कान्तः शान्तारिविग्रहः ।
आसीद् वसन्तदेवोऽस्माद्
दान्तसामन्तवन्दितः ।।

नृपनरेन्द्रदेववर्णनम्

(Description of King Narendradeva)

अस्यान्तरेऽप्युदयदेव इति क्षितीशा-
ज्जातस्त्रयोदश इतश्च नरेन्द्रदेवः ।
मानोन्नतो नतसमस्तनरेन्द्रमौलि-
मालारजोनिकरपांशुलपादपीठः ।।

नृपशिवदेववर्णनम्

(Description of King Śivadeva)

दाता सद्द्रविणस्य भूरिविभवो जेता द्विषत्संहतेः
कर्ता बान्धवतोषणस्य विधिवत्पाता प्रजानामलम् ।
हर्ता संश्रितसाधुवर्गविपदां सत्यस्य वक्ता ततो
जातः श्रीशिवदेव इत्यभिमतो लोकस्य भर्ता भुवः ।।

नृपजयदेववर्णनम्

(Description of King Jayadeva)

अङ्गश्रिया परिगतो जितकामरूपः
काञ्चीगुणाढ्यवनिताभिरुपास्यमानः ।
कुर्वन् सुराष्ट्रपरिपालनकार्यचिन्तां
यः सार्वभौमचरितं प्रकटीकरोति ।।

राज्यं प्राज्यसुखोर्जितद्विजजनप्रत्यर्पिताज्याहुति-
ज्योतिर्जातशिखाविजृम्भितजिताशेषप्रजापद्रुजम् ।
बिभ्रत् कण्टकवर्जितं निजभुजावष्टम्भविस्फूर्जितं
शूरत्वात्परचक्रकाम इति यो नाम्नापरेणान्वितः ।।

स श्रीमाञ्जयदेवाख्यो
विशुद्धबृहदन्वयः ।
लब्धप्रतापः संप्राप्त-
बहुपुण्यसमुच्चयः ।।

रौप्यपद्मवर्णनम्

(Description of the Silver Lotus)

नालीनालीकमेतन्न खलु समुदितो राजतो राजतोऽहं
पद्मापद्मासनाब्जे कथमनुहरतो मानवा मानवाभे ।
पृथ्व्यां पृथ्व्यां न मादृग् भवति हृतजगन्मानसे मानसे वा
भास्वान् भास्वान् विशेषं जनयति न हि मे वासरो वासरो वा ।।

इतीव चामीकरकेसराली
सिन्दूररक्तद्युतिदन्तपङ्क्तचा ।

राजीवराजीं प्रति जीवलोके
सौन्दर्यदर्पादिव स प्रहासम् ।।

स्रोतः स्वर्गापगायाः किमिदमवतरल्लोलकल्लोलरम्यं
किं ब्रह्मोत्पत्तिपद्मं तलकमलवरप्रेक्षणायोपयातम् ।
संप्राप्तं चन्द्रमौलेरमलनिजशिरश्चन्द्रबिम्बं किमत्रे-
त्येवं यद्वीक्ष्य शङ्कां वहति भुवि जनो विस्मयोत्फुल्लनेत्रः ।।

श्रीवत्सदेव्या नृपतेर्जनन्या
समं समन्तात्परिवारपद्मैः ।
रौप्यं हरस्योपरि पुण्डरीकं
तदादरैः कारितमत्युदारम् ।।

बुद्धकीर्तेः

रौप्यपद्मवर्णनम्

तस्येदं प्रमथाधिपस्य विपुलं ब्रह्माब्जतुल्यं शुभं
राजद्राजतपङ्कजं प्रविततं प्रान्तप्रकीर्णैर्दलैः ।
पूजार्थं प्रविधाप्य तत्पशुपतेर्यत् प्रापि पुण्यं मया
भक्त्या तत् प्रतिपाद्य मातरि पुनः संप्राप्नुयां निर्वृतिम् ।।

किं शम्भोरुपरि स्थितं ससलिलं मन्दाकिनीपङ्कजं
स्वर्गोद्भिन्ननवाम्बुजेक्षणधिया संप्राप्तमम्भोरुहम् ।
देवानां किमियं शुभा सुकृतिनां रम्या विमानावली
पद्मं किं करुणाकरस्य करतो लोकेश्वरस्यागतम् ।।

नृपजयदेवस्य

Paśupati Temple Inscription, *NIGC*, pp. 115-118
A.D. 1033

शिवस्तुतिः

(Homage to Śiva)

ख्यात्या यः परमेश्वरोऽपि वहते वासो दिशां मण्डलं
व्यापी सूक्ष्मतरश्च शङ्करतया ख्यातोऽपि संहारकः ।
एकोऽप्यष्टतनुः सुरासुरगुरुर्वीतत्रपो नृत्यति
स्थाणुः पूज्यतमो विराजति गुणैरेवं विरुद्धैरपि ॥

नृपकोकल्लदेववर्णनम्

(Description of King Kokalladeva II)

नम्रं कार्मुकवत्कृतं नियमितं तूणीरवत् पृष्ठतः
काष्ठासु क्षणमात्रदृष्टविहितभ्रान्तं च दोर्दण्डवत् ।
कृत्वा साधु परिच्छदेन रहितं सम्यक्करे स्थापितं
शत्रूणामखिलं कुलं नरपतिश्रेष्ठेन येनासिवत् ॥

Banaras Plates of Karṇa; *CII*, IV, p. 243
A.D. 1042

नृपकर्णदेववर्णनम्

(Description of King Karṇadeva)

नीतेषु प्रमदावियोगविधिना प्राग्ब्रह्मचारिव्रतं
सार्धं बन्धुतया गृहस्थपदवीं कारागृहस्थापनात् ।
वानप्रस्थपदं वनाश्रयवशाद् भैक्षाच्च भिक्षोः स्थितिं
येनैवं चतुराश्रमैकगुरुता स्पष्टीकृता शत्रुषु ॥

यस्यार्थिव्रजवाञ्छिताधिकफलप्राप्त्यै निशम्यात्मभूः
प्राक्प्रत्यग्धरणीधरान्तररसापारात् स्फुरद्घोषणाः ।
एतन्निर्मितम् आः पुरा परिमितं ब्रह्माण्डमस्मिन् कथं
संभास्यन्ति यशांसि चेदिनृपतेरित्याकुलोऽभूच्चिरम् ।।

सर्वानन्दस्य

Goharwa Plates of Karṇadeva; *EI*, XI 144
A.D. 1047

सेनावर्णनम्

(Description of Army)

उद्दण्डशुण्डाग्रविनिःसृतेन
फूत्कारचूर्णीकृतशीकरेण ।
मुक्तातपत्रायितमम्बरार्धे
यस्य प्रयाणे पृतनागजानाम् ।।

नाहं नाथ विपक्षगोत्रवसतिर्न त्यक्तपूर्वस्थिति-
र्यस्याख्यातुमितीव चेदिनृपतेर्दिक्चक्रमाक्राम्यतः ।
प्रान्तश्रान्तवरूथिनीकरिकरास्फालावहेलोल्लसत्-
कल्लोलावलि बाहुदण्डमुदधिश्चक्रन्द सान्द्रस्वनैः ।।

Goharwa Inscription of Karṇa; *CII*, IV, p. 257
A.D. 1047

नृपपरमेश्वरवर्मवर्णनम्

(Description of King Parameśvaravarman)

श्रीमाञ्छ्रीपरमेश्वरो नरपतिर्नानाकलैकालयो
धर्मेद्धो बलवीर्यकीर्तिपरमः सन् सार्वभौमः कृती ।

जित्वा पापकपाण्डरङ्गनृगणान् हस्ताद्रिरन्ध्रे शके
सेनासाङ्गचक्रतौ शिलाचयमिमं संस्थापयामास वै ।।

aun Garai Rock Inscription of Jaya Parameśvaravarman I; Śaka 972;
α, p. 150
1050

विष्णुस्तुतिः

(Homage to Viṣṇu)

विष्णुं नमध्वं यद्वक्षो-
नुकरोति सकौस्तुभम् ।
मध्यभागोप्तमाणिक्य-
महानीलोपलश्रियः ।।

नृपसूर्यवर्मवर्णनम्

(Description of King Sūryavarman)

यस्याङ्गतश्च्युते वारि-
बिन्दौ राज्याभिषेचने ।
सर्वां महीं विहायाशु
तापोऽगाद् द्विषतां मनः ।।

यद्यात्रोद्धूतधूलीभि-
र्भुवने सान्धकारिते ।
अविशेषाणि भूतानि
प्राक् सृष्टेरभवन्निव ।।

यथा सर्वानवद्याङ्गी
रमणी सुमनोरमा ।

रतये विधिना दत्ता
    तथा यस्यारिवाहिनी ॥

द्वयं शिवाकुलं येन
    द्वौ शक्त्या प्रापितौ सदा ।
आनम्रो भूपती राज्यम्
    अनानम्रो महावनम् ॥

जयेन्द्रपण्डितवर्णनम्

(Description of Jayendrapaṇḍita)

उच्चैरासनमास्थाय
    शिष्याणां बोधनं महत् ।
चक्रे योऽनुदिनं रुच्या
    भास्वानम्भोरुहामिव ॥

शास्त्रेषु शाब्दिकाः श्रुत्वा
    यस्यान्याधिकमूहनम् ।
तत्कर्तैवं न शक्तो यं
    व्याख्यातुमिति मेनिरे ॥

महाप्रश्नमहीध्रेण
    यस्य धीदुग्धनीरधिः ।
प्रादादपूर्वमिष्टार्थं
    मथितो विबुधाकरैः ॥

फलप्रियस्य

CI, I, pp. 199, 203, 204
A.D. 1060

नृपपृथ्वीदेववर्णनम्

(Description of King Pṛthvīdeva)

ततः पृथ्वीदेवः सकलधरणीभूषणमणिः
समुत्पन्नः श्रीमान् बुधजनमनोऽम्भोजतरणिः ।
प्रतापाग्नौ यस्य ज्वलति सततोत्तप्तहृदयै-
र्विलीनं सामात्यैर्जतुघटितगात्रैरिव परैः ।।

यस्मिन् महीमवति नीतिविचारसारे
वातोऽप्यवर्त्मनि पदं न करोति कोऽन्यः ।
धर्माध्वनिष्ठितमतौ च न दैवतोऽपि
लोकेषु नूनमुपघातलवोदयोऽस्ति ।।

Raipur Inscription of Pṛthvīdeva I; *CII*, IV, p. 399
A.D. 1069

कीर्तिः

(Fame)

इन्दुप्रभां निन्दति हारगुच्छं
जुगुप्सते चन्दनमाक्षिपन्ती ।
यत्र प्रभौ दूरतरं प्रयाते
वियोगिनीव प्रतिभाति कीर्तिः ।।

. . . .

स्वर्गराजगजदन्तरुचीनि
क्षीरनीरनिधिशङ्खशुचीनि ।
शार्ङ्गितल्पफणिकञ्चुकभांसि
स्फीततां दधति यस्य यशांसि ।।

दानम्

(Charity)

यो ब्रह्मणां पाणिषु पञ्चषाणि
दाता निधत्ते पयसां पृषन्ति ।
तैरेव तृष्णामवधूयते च
रत्नाकरेऽपि प्रथयन्त्यवज्ञाम् ॥

Khairha Inscription of Yaśaḥkarṇa; *CII*, IV, pp. 293-4
A.D. 1076

नृपजयसिंहवर्णनम्

(Description of King Jayasiṁha)

यस्य प्रतापशिखितापभयात् पलाय्य
क्वाप्याश्रयं सुखकरं भुवनेष्वलब्ध्वा ।
प्राप्यैनमेव शरणं रिपवः सुखेन
तस्थुः स भूपतिरभूज्जयसिंहदेवः ॥

अपि च
निजान्वयप्रदीपोऽपि तैलवंशविवर्धनः ।
सिंहोऽप्यसौ मृगदृशां प्रिय इत्यद्भुतं महत् ॥

नृपाहवमल्लवर्णनम्

(Description of King Āhavamalla)

लुण्टाकवद्रिपुपुरेष्वचरत्प्रतापः
कोपानलेप्यशलभायत यस्य चोळः ।

स स्वीयबान्धवपरिग्रहकल्पवृक्षः
श्रीमानभून्नृपतिराहवमल्लदेवः ।।

किञ्च
शौर्यं शत्रुनृपाङ्गनाश्रवणयोः पत्रप्रमोषीकर-
स्त्यागो याचकयाचकान्वयलिपेः प्रक्षालनार्थं जलम् ।
सत्यं यस्य जगद्वशार्थमभवद्दिव्यौषधं किं बहु
ब्रूमस्तत्र न सन्ति के क्षितिपतौ त्रैलोक्यमल्ले गुणाः ।।

सोमेश्वरभट्टवर्णनम्
(Description of Someśvarabhaṭṭa)

त्यागे कल्पतरुः परोपकरणक्रीडासु सोऽयं शिबि-
र्भीष्मः स्त्रीविषये विधुः सुखविधौ सत्ये च कर्णः स्वयम् ।
संजातोऽयमिति क्षितौ सुमतिभिः सोमेश्वरार्यः सदा
ख्यातः कुन्तलचक्रवर्तिपरमाराध्यो बुधग्रामणीः ।।

वेधा वेद चतुष्टये स हि गुहः शब्दान्वये शङ्करः
षट्तर्क्यां कविताविवेचनविधौ वाल्मीकिरेव स्वयम् ।
साक्षाद्व्यासमुनिः पुराणसरणौ स्मृत्यर्थसार्थे मनुः
श्रीसोमेश्वर मिश्र एव भुवने ब्राह्मण्यपुण्यार्णवः ।।

. . . .

त्रिभुवनमल्लदेवपरिपूजित एष समस्त सम्पदा
विधुरविवेदशास्त्रपरमश्रवणानि बहून्यकारयत् ।
पुरि पुरि रम्यहर्म्यमुपकल्प्य निवास्य च तत्र सद्द्विजान्
नहि सदृशोऽस्य कश्चन भवेद्भुवि वा दिवि वापरः सुकृत् ।।

. . . .

आकाशान्निपतेद्ध्रुवो भुवि तदा स्याच्छीतलो वानल-
स्तीक्ष्णो वर्क्षपतिः क्षितिः प्रविचलेद्वा स्यात्तमस्तेजसि।
श्रीसोमेश्वरसूरिवक्त्रकमलान्मिथ्या वचो निस्सर-
त्यज्ञानादपि चेत्कदाचिदुचितं वासौ जहाति क्वचित् ॥

Gadag Inscription of Vikramāditya VI; *EI*, XV, pp. 350, 353
A.D. 1098

शिवस्तुतिः
(Homage to Śiva)

यः कर्ता जगदुद्भवस्थितिलयानुद्भूतया लीलया
यो वाचामधिनायकश्श्रयति यं सर्वज्ञतैकाश्रया।
यद्भक्तिप्रवणैरपायविषमस्तार्य्यो भवाम्भोनिधि-
र्देयाद्वः स विभूतिमिन्दुशकलापीडो भवानीपतिः॥

मायामायामिनीं यो वहति जगदिदं रञ्जयन्तीं जयन्तीं
ज्ञानाज्ञानप्रसूतिं स्फुटरुचिवपुषा योगभाजागभाजा।
सत्त्वासत्त्वानुकम्पी हितमुदितमहातापशूनां पशूनां
शम्भुश्शम्भुग्नपापव्यतिकृति भवतः स प्रपातात्प्रपातात्॥

विष्णुस्तुतिः
(Homage to Viṣṇu)

चक्रे चक्रेण दैत्यप्रकरमतिबलं यः समस्तं समस्तं
पाता पातालमूलाहितबलिरनिशं भासुराणां सुराणाम्।
सद्यस्सद्यत्वघं वो हरिरखिलजगद्रक्षणेन क्षणेन
स्वैरं स्वैरंशलेशैरिव धरणिगतैस्सम्भवद्भिर्भवद्भिः॥

नृपमान्धातृवर्णनम्

(Description of King Māndhātṛ)

वंशेऽस्मिन्नुद्बभूवाद्भुतमहिमभरभ्राजितस्यासुरारे-
रंशो विश्वम्भरार्त्तिप्रशमनमनिशं कर्तुमुत्सिद्धकीर्तिः।
मान्धाता नाम राजा जननयनमहानन्दसन्दोहदायी
यस्याधर्मक्षयाय व्यचरदतिजनात् चक्रमाचक्रवालात्॥

तस्मिन्नृपे परमतेजसि शासतीमां
भूमिञ्चचार हरिणा हरिणस्सहापि।
सर्वो मिथः सहजमप्यजहाद्विरोधं
धर्मस्त्वधर्मविरहान्न तथा चकार॥

Kanyākumārī Inscription of Vīra-Rājendradeva; the 7th year; *EI*, XVIII, pp. 31-2, 35

वर्धमानस्तुतिः

(Homage to Vardhamāna)

श्रीमन्नाथकुलेन्दुरिन्द्रपरिषद्वन्द्यः श्रुतश्रीसुधा-
धाराधौतजगत्तमोपहमहः पिण्डप्रकाण्डं महत्।
यस्मान्निर्मलधर्मवार्धि विपुलश्रीवर्द्धमाना सतां
भर्तुर्भव्यचकोरचक्रमवतु श्रीवर्धमानो जिनः॥

गौतमस्वामिकेवलिस्तुतिः

(Homage to Gautamasvāmin Kevalin)

जीयादर्थयुतेन्द्रभूतिविदिताभिख्यो गणी गौतम-
स्वामी सप्तमहर्द्धिभिस्त्रिजगतीमापादयन् पादयोः।

यद्बोधाम्बुधिमेत्य वीरहिमवत्कुत्कीलकण्ठाद् बुधा-
म्भोदाता भुवनं पुनाति वचनस्वच्छन्दमन्दाकिनी ॥

श्रुतकेवलिस्तुतिः

(Homage to Śrutakevalins)

तीर्थेशदर्शनभवन्नयदृक्सहस्र-
विस्रब्धबोधवपुषः श्रुतकेवलीन्द्राः ।
निर्भिन्दतां विबुधवृन्दशिरोभिवन्द्याः
स्फूर्जितवचः कुलिशतः कुमताद्रिमुद्राः ॥

भद्रबाहुवर्णनम्

(Description of Bhadrabāhu)

वर्ण्यः कथं नु महिमा भण भद्रबाहो-
र्मोहोरुमल्लमदमर्दनवृत्तबाहोः ।
यच्छिष्यताप्तसुकृतेन स चन्द्रगुप्तः
शुश्रूष्यते स्म सुचिरं वनदेवताभिः ॥

Śravaṇa-Belgola Epitaph of Malliṣeṇa; *EI*, III, pp. 189-90
A.D. 1129

सामन्तवल्लभराजवर्णनम्

(Description of Feudatory Chief Vallabharāja)

महाशक्त्याधारो विबुधपरिपन्थिप्रतिहति-
प्रवीणः प्रोद्दामप्रसरशिखिविक्रान्तलडहः ।

महाराजः श्रीमान् भुवनतलविख्यातमहिमा
सतामित्थं योऽसौ जनयति कुमारभ्रममिह ।।

तुरङ्गाणां वाहे बहुविविधशिक्षापरिचये
चिकित्सायामुच्चैर्गुणगणपरिज्ञानविषये ।
अदृष्ट्वा दृष्टान्तं सुसदृशमनाकर्ण्य च कलौ
कविव्रातो यस्य स्तुतिविषयतामौनमभजत् ।।

यः कृत्वा करिबन्धकौतुकरसश्रद्धालुरुर्वीतले
निर्मातङ्गमखण्डविन्ध्यविपिनं पत्या पतिं दन्तिनाम् ।
गौडेन्द्रं मघवत्सदृक्षमपृथूकुर्वन्नपि प्रत्यहं
वीरो वैरिपुरं व्यधत्त करिणां बन्धाय विन्ध्यस्थलीम् ।।

. . . .

तेनेदमाभरणमारचितं पृथिव्याः
पृथ्वीयतेर्निजपतेर्महिषीति मत्वा ।
रेवन्तमन्दिरमिषान्नयनोपभोग्यं
भक्त्योपचारचतुरेण यशोधनेन ।।

सप्ताश्वसूनुभवनोत्तमचित्रकर्म-
निर्माणतः सुविशदां किरता च कीर्तिम् ।
तेनाधुना सह यशोधनमानिलोकै-
र्विस्मापितः स भगवानपि विश्वकर्मा ।।

देवपाणेः

kaltārā Inscription of Ratnadeva II; *CII*, IV, pp. 432-3
.D. ±1135

शिवस्तुतिः

(Homage to Śiva)

पादन्यासनमत्क्षितिप्रविलसद्दो:काण्डचण्डभ्रमि-
भ्रान्तप्रान्तनगाभिघातविदधद्दिक्पालपर्याकुलम् ।
खट्वाङ्गोत्कटकोटिघृष्टिविचटद्ब्रह्माण्डमुड्डामरं
पायात्ताण्डवडम्बरं पुरभिदो देवस्य वः सर्वदा ।।

सरस्वतीस्तुतिः

(Homage to Sarasvatī)

यस्याः प्रसादमधिगम्य करोदरस्थं
भूतं च भावि च भवच्च मनन्ति सन्तः ।
तां वाचमच्युतपदोदयहेतुभूतां
वन्दामहे त्रिभुवनव्यवहारहेतुम् ।।

गणेशस्तुतिः

(Homage to Gaṇeśa)

नृत्यावताररभसोच्छलदच्छदान-
पानप्रमत्तमधुपव्रजगुञ्जितेन ।
यो विघ्नवृन्दमुरु तर्जयतीव देवो
द्वैमातुरः स भवतां हितमातनोतु ।।

नृपरत्नदेववर्णनम्

(Description of King Ratnadeva)

स्तोतव्यः समरोत्सवैकरसिकः श्रीरत्नदेवः स किं
सर्वत्रैव सदैव सैन्यनिवहैः साकं तथैकाकिना ।

सारम्भं परिभर्त्सयन्निव मुहुर्युद्धाय बद्धादरो
भूपानामुपरि स्फुरत्यविरतं यस्योग्रयोगारवः ।।

यस्मिन्निःसीमभीमाद्भुतमहसि दिशां चक्रमाक्रान्तुकामे
ढक्कानिर्घोषघोरप्रतिरवरसितैः सर्वतः पर्वतेन्द्राः ।
उद्वल्गद्भूरिसेनानिवहगुरुधराधारणव्यग्रतार्ति-
त्रासान्मुक्तप्रचण्डध्वनिभिरिव दिशामीश्वरानाह्वयन्ति।।

मन्त्रिनिम्बदेववर्णनम्

(Description of Minister Nimbadeva)

निजतनुजितकामः सर्वविद्याधिरामः
सुजनमुकुटदाम श्रीयशोदिव्यधाम ।
नृपसदसि ललामः सज्जनानामवामः
समभवदथ पुत्रो निम्बदेवस्तदीयः ।।

यो वासः प्रियभाषितस्य सदनं धर्मस्य विश्रामभूः
कारुण्यस्य निवेशनं सुमनसां प्रज्ञागुणस्याश्रयः ।
आधारो विनयस्य मन्दिरमुरु स्थैर्यस्य वेश्म श्रियः
कान्तेरायतनं धृतेरपि सदः कीर्तेरनन्यालयः ।।

मन्त्रिपुरुषोत्तमवर्णनम्

(Description of Minister Puruṣottama)

तस्यासीमदमक्षमादिकगुणग्रामैकविश्रामभू-
र्भूदेवान्वयमण्डनो नयविदामाद्योऽनवद्यक्रमः ।
प्रत्युद्यद्गुरुचारुपौरुषजुषां प्रज्ञावतामुत्तमः
पुत्रोऽभूत्पुरुषोत्तमो भुवि दधन्नाम स्वकं सार्थकम् ।।

यो जग्राह समुन्नतिं सुरगिरेर्गाम्भीर्यमम्भोधित-
स्त्यागित्वं रविनन्दनाद्दिनपतेस्तीव्रप्रवाहं महः।
पञ्चास्यादुरुविक्रमं शुचियशोराशिं दशास्यान्तकात्
पाण्डित्यं च गिरांपते रतिपतेः सौन्दर्यमूर्जस्वलम्॥

कल्पद्रुम श्रममपास्य सुखी भव त्वं
हे रोहण व्रणभयं विगतं तवापि।
सा कामधेनुरपि गच्छतु वत्समद्य
दीर्घायुरस्तु भुवने पुरुषोत्तमोऽसौ॥

यो मन्त्रसंशयविनिर्णयसाधुबुद्धिः
शक्तित्रयप्रणयनप्रगुणस्वभावः।
षाड्गुण्यपुण्यमहिमा व्यपनीतगर्वः
सर्वोपधाभिरभिलक्षितसाधुशीलः॥

तं वीक्ष्य कोशलपतिर्नृपरत्नदेवः
सर्वैरमात्यगुणराशिभिरभ्युपेतम्।
सर्वाधिकारपदमद्वयमस्य दत्त्वा
निष्कण्टकं भुवि चिराय चकार राज्यम्॥

. . . .

मानुष्यं करिकर्णतालचपलं निःसङ्ख्यदुःखास्पदं
लक्ष्मीं च क्षणभङ्गसङ्गविरसामेकान्तमालोक्य च।
नानाशास्त्रपुराणवेदसतताभ्यासैः समुन्मार्जितं
तस्य श्रीपुरुषोत्तमस्य समभूद्धर्मैकनिष्ठं मनः॥

तटाकवर्णनम्

(Description of a Tank)

गम्भीरं बहुसत्त्वं
निर्मलमतिशोभनं जनैः सेव्यम् ।
हृदयमिव स्वकमकरोद्
रत्नपुरे सागरं यश्च ।।

क्रीडावनवर्णनम्

(Description of a Pleasure Garden)

क्रीडन्मञ्जुमधुव्रतं प्रविलसत्प्रोत्फुल्लवल्लीशतं
नानापुष्पफलोदितं प्रमुदितानन्तद्विजोत्कूजितम् ।
तेनैवात्र विचित्रपादपलतासन्तानरुद्धाम्बरं
चक्रे विक्रमशालिना मुरुजितः क्रीडावनं शोभनम् ।।

काशलस्य

Koni Inscription of Pṛthvīdeva II; *CII*, IV, pp. 467-9
A.D. 1148

कविरत्नसिंहवर्णनम्

(Description of Poet Ratnasiṁha)

श्रीमामेतनयः समस्तजगतीविस्तीर्णकीर्णस्फुरत्-
कुन्देन्दुद्युतिकीर्तिसन्ततिलताव्यासक्तदिङ्मण्डलः ।
राजत्युन्मदवादिवृन्ददलनो लीलाविहारः श्रियः
शीलाचारविवेकपुण्यनिलयः श्रीरत्नसिंहः कविः ।।

तत्पत्नीरम्भावर्णनम्

(Description of his wife Rambhā)

शचीव जिष्णोर्गिरिजेव शम्भो-
दुग्धाब्धिपुत्रीव च चक्रपाणेः।
साध्वी सदा बन्धुजनाभिपूज्या
रम्भेति नामाभवदस्य पत्नी ॥

कविदेवगणवर्णनम्

(Description of Poet Devagaṇa)

ताभ्यामजायत जगत्त्रयघुष्टकीर्ति-
राखण्डितारिबुधमण्डलचण्डदर्पः।
चण्डीशचारुचरणाम्बुजचञ्चरीकः
प्रज्ञापयोधिरिह देवगणस्तनूजः ॥

एतद्यस्य जगद् यशोभिरभितो डिण्डीरपिण्डप्रभै-
राक्रान्तं धवलं विलोक्य निखिलं गोपाङ्गनावीक्षितः।
कालिन्दीह्लदकालनेमिदलनप्रारम्भवीतादर-
स्तीरे ताम्यति वारिराशितनयायत्तोऽपि जातभ्रमः ॥

पीयूषद्रवसान्द्रबिन्दुवसतिर्यस्यास्य वाक्चन्द्रिका
विद्वच्चक्रचकोरचञ्चुपुटकैरापीयमानानिशम्।
किञ्चायं करपञ्जरोऽखिलमिलन्नानादिगन्तार्थिनां
भूयोऽभीष्टफलप्रदानचतुरः स्वाधीनकल्पद्रुमः ॥

तत्पत्नीद्वयप्रभाजाम्होवर्णनम्

(Description of his two wives Prabhā & Jāmho)

चन्द्रिकेव शिशिरांशुमालिनो
मञ्जरीव सुरमेदिनीरुहः।
कान्तिनिर्जितसुराङ्गनागणा
तस्य साधुचरिता वधूः प्रभा॥

जाम्हो नाम्नी द्वितीयास्य
विलासवसतिः प्रिया।
अमितप्रेमबाहुल्याद्
द्वितीयं प्राणमन्दिरम्॥

लावण्यप्रतिमल्लता मदभरा मौलीन्दुना क्रोधतो
दग्धस्यापि मनोभवस्य भुवने विद्येव सञ्जीवनी।
सत्सौभाग्यगुणैकगर्ववसतिः प्राणाधिका प्रेयसी
यां निर्माय सरोजभूः प्रमुदितः प्राप्तः परां निर्वृतिम्॥

तत्पुत्रीभोपावर्णनम्

(Description of his daughter Bhopā)

भोपास्य दुहिता साध्वी
कलिकालविचेष्टितैः।
अस्पृष्टा स्वर्धुनीवेयं
भुवनत्रयपावनी॥

शिवमन्दिरवर्णनम्

(Description of a Śiva Temple)

चक्रे देवगणो धाम
बिल्वपाणिपिनाकिनः ।
साम्बाग्रामे तुषाराद्रि-
शिखराभोगभासुरम् ।।

नानाभूपालभुक्तिक्षितिजघनघनाश्लेषतोषादिवादौ
दिग्वामाकामपीडातरलतनुगुरुश्लेषलिप्सं समन्तात् ।
कामीवेदं विदग्धो विरचितपरमप्रेमहासं त्वरावत्
स्ववमाणां समक्षं गगनपरिसरश्रीमुखं चुम्बतीव ।।

देवगणस्य

Ratanpur Inscription of Pṛthvīdeva II; *CII*, IV, pp. 486-7
A.D. 1150

शिवस्तुतिः

(Homage to Śiva)

त्रैलोक्यसौधशिल्पी य-
स्त्रिवेदीवाक्यसत्कविः ।
नित्यप्रयत्नबोधेच्छः
सोऽष्टमूर्तिः श्रियेऽस्तु वः ।।

कलधौतशुक्तिरिव चन्द्रकला
जयति स्मरान्तकशिरोविधृता ।
अलिकाक्षिवह्निजनितोग्रतृषा
सुतया गिरेः सुरसरित्पयसे ।।

आचार्यभावब्रह्मवर्णनम्

(Description of Ācārya Bhāvabrahman)

कौपीनमात्रवसनः शुचिभस्मशायी
पञ्चार्थबोधसुकृती मितभैक्षभोजी ।
यो ब्रह्मचर्यविधिनान्यसनत्कुमारः
पातञ्जलागमनिरूपितयोगसङ्गः ।।

भिक्षोपार्जितकाञ्चनान्नवसनैः संप्रीणयत्यर्थिनः
स्नेहेन प्रगुणीकरोति सुधियः संतर्पितान् सूनृतैः ।
क्लेशोन्मूलनधर्म्यकर्मनिरतः साक्षात्कृतत्र्यम्बको
भावब्रह्मसमस्तपस्विषु कलौ दृष्टो न पाञ्चार्थिकः ।।

परिग्रहविमुक्तोऽपि
गृह्णाति हृदि यः शिवम् ।
कामक्रोधौ निगृह्णाति
क्षमावानपि सद्व्रतैः ।।

प्राणायामसमाधिसिद्धनियमध्यानासनैरन्वहं
यः कृत्वा हृदयाम्बुजे स्मररिपुं बुद्ध्या समभ्यस्यति ।
मैत्री तस्य सुधीभिरात्ममुदिता शास्त्रागमे योगिनः
शिष्याणां करुणा भवेच्च विषयोपेक्षा शिवज्ञानतः ।।

पृथ्वीधरस्य

Tewar Inscription of Gayakarṇa; *CII*, IV, pp 306-7
A.D. 1151

शिवस्तुतिः

(Homage to Śiva)

कल्याणितामविकलां भवतां तनोतु
भाले कलानिधिकला शशिशेखरस्य ।
एकैव या प्रमथसार्थगतां द्वितीया-
बुद्धिं प्रदोषविरहेऽपि करोति नित्यम् ।।

किं मालाः कुमुदस्य किं शशिकलाः किं धर्म्यकर्माङ्कुराः
किं वा कञ्चुकिकञ्चुकाः किमथवा भूत्युद्गमा भान्त्यमी ।
इत्थं नाकिवितर्किताः शिवशिरःसञ्चारिनाकापगा-
रिङ्गद्वल्गुतरङ्गभङ्गिततयः पुण्यप्रपाः पान्तु वः ।।

गणेशस्तुतिः

(Homage to Gaṇeśa)

विघ्नौघसन्तमससंहरणाय शक्तं
मुक्तं कलङ्ककलया शकलं सुधांशोः ।
कुन्दावदाततरदन्तमिषाद् दधानः
श्रेयः परं दिशतु वः सदयं द्विपास्यः ।।

सरस्वतीस्तुतिः

(Homage to Sarasvatī)

रूपैरनेकैर्व्यवहारजात-
मातन्वती पातु सरस्वती वः ।
यल्लेशलालित्यलवादपि स्यात्
संसत्सु पुंसां गरिमा गरीयान् ।।

कीर्तिः

(Fame)

पुण्यामृतेन संसिक्ता
शुद्धसत्त्वप्रवर्धिता ।
यत्कीर्तिव्रततिः सर्वं
व्याप ब्रह्माण्डमण्डपम् ।।

नृपकर्णवर्णनम्

(Description of King Karṇa)

अस्मद्भर्तृपराभवेन सकलां भुङ्क्ते भुवं यामसौ
तामेतां तनवामहै तनुतराकारामितीव स्त्रियः ।
यत्प्रत्यर्थिमहीभुजां नयनजैर्बाष्पैः पयोधीन् व्यधुः
स्फारान् रत्नमहोर्मिभिः पुनरमी तं वर्धयाञ्चक्रिरे ।।

नृपनरसिंहदेववर्णनम्

(Description of King Narasiṁhadeva)

शृङ्गारशाला कलशी कलानां
लावण्यमाला गुणपण्यभूमिः ।
असूत पुत्रं गयकर्णभूपा-
दसौ नरेशं नरसिंहदेवम् ।।

अस्य श्रीनरसिंहदेवनृपतेः प्रोद्यन् यशश्चन्द्रमा
दिग्भित्तीर्विदधातु बन्धुरसुधासंभारगर्भा इव ।

भूर्भर्तारमवाप्य चैनमुचितं प्रीतिं तथा प्राप्नुयात्
पूर्वेषां न यथा मनागपि महाक्षोणीभृतां ध्यायति ।।

शशिधरस्य

Bherāghāṭ Inscription of Narasiṁha; *CII*, IV, pp. 314-16
A.D. 1155

शिवस्तुतिः

(Homage to Śiva)

यश्चामीकरकुम्भसन्निभकुचद्वन्द्वस्य रत्युत्सव-
क्रीडानेहसि शैलराजदुहितुर्वक्त्रारविन्दस्य च ।
निःपर्यायदिदृक्षयेव भगवान् धत्ते स्म नेत्रत्रयं
स श्रेयांसि समातनोतु भवतामर्धेन्दुचूडामणिः ।।

ब्रह्मेन्द्रोपेन्द्रचन्द्रद्युमणिकुलगिरिक्ष्मासमुद्रादिरूपै-
र्लोकं संक्रान्तबिम्बं नखमुकुरतले यत्पदाब्जाङ्गुलीनाम् ।
दृष्ट्वा शैलेन्द्रपुत्री परिणयसमये विस्मयं प्राप लज्जा-
नम्रीभूताननेन्दुः स हरतु दुरितं पार्वतीवल्लभो वः ।।

आम्रवणवर्णनम्

(Description of a Mango Grove)

तेनैवाम्रवणं कृतं घनतरच्छायानिरस्तातपं
पाणिप्राप्यफलोत्करैर्मधुरसैः पान्थव्रजं प्रीणयत् ।
कूजत्कोकिलकाकलीव्यतिकरप्रारभ्यमानस्मर-
प्रौढाज्ञाविदलन्मनस्वितरुणीमानग्रहग्रन्थिकम् ।।

प्रशस्तिः

(Eulogy)

घनरसवतीं गभीरां
स्वच्छतरां कविविचाररमणीयाम् ।
सरसीमिव प्रशस्तिं
त्रिभुवनपालो व्यधाद्विबुधः ।।

त्रिभुवनपालस्य

Ratanpur Inscription of Pṛthvīdeva II; *CII*, IV, pp. 504, 507
A.D. 1163

शिवस्तुतिः

(Homage to Śiva)

मूर्धन्यस्तजटाग्रपल्लवचयो भालस्थलीमल्लिका-
तार्तीयेक्षणहव्यवाहविसरज्ज्वालाप्रदीपद्युतिः ।
संपूर्णः सुरसिन्धुतुङ्गलहरीवारिप्रवाहैरसौ
शम्भुर्मङ्गलकुम्भविभ्रमपदं बिभ्रत्सदा पातु वः ।।

गणेशस्तुतिः

(Homage to Gaṇeśa)

ऊर्ध्वीकृतः सुरसरित्सलिलावगाहा-
दुद्दण्डचण्डतरचारुकरो विभाति ।
ब्रह्माण्डमण्डलमहोत्पलनाललीलां
बिभ्रत्स वो गणपतेरवतादजस्रम् ।।

चन्द्रस्तुतिः

(Homage to Candra)

देवः पीयूषधारानिकरपरिगलद्बिन्दुसन्दोहकीर्ण-
व्योमाशाचक्रवालो मदननृपचमूदर्पणः कैरवाणाम् ।
बन्धुः सिन्धुप्रसूतिः स जयति भुवनानन्दसम्भारकन्दो
लोलाक्षीमानमुद्राविघटनपटुतामावहन् शुभ्रभानुः ॥

ब्राह्मणगङ्गाधरवर्णनम्

(Description of Brāhmaṇa Gaṅgādhara)

यः प्रज्ञैकविशाललोचनपुटं धत्ते तृतीयं सदा
सद्भूतिं च तनोति यो निजतनौ दुर्वारमारापहः ।
दुर्गाश्लेषकरोऽरिवादिनिवहे पुत्रस्ततोऽभूदसौ
बिभ्राणो द्विजराजसुन्दरपदं मौलौ स गङ्गाधरः ॥

कीर्तिः

(Fame)

सप्ताम्भोनिधितीरवारिणि भृशं यत्कीर्तिहंसी मुहु-
र्भ्रान्त्वा श्रान्तमियं सुरालयमगान्मन्दाकिनीकाङ्क्षया ।
भुक्त्वा बालमृणालनालशकलान्युद्दामकामोत्सुका
ब्रह्माण्डोदरभाण्डवारिजभुवो रन्तुं मरालं गता ॥

शिवमन्दिरवर्णनम्

(Description of a Śiva Temple)

तेन केदारदेवस्य
धाम मल्लालपत्तने ।
धीमता कारितं रम्यं
स्वयशोराशिभासुरम् ।।

उर्वीमालिङ्ग्य पूर्वं गुरुजघनघनाश्लेषलब्धप्रमोदा-
मेतत् काष्ठावधूनां ध्वजभुजवलनैः श्लेषदक्षं समन्तात् ।
कामव्यासक्तचेता इव विबुधपुरीसुन्दरीणां समक्षे
त्यक्तव्रीडं निकामं गगनपरिसरश्रीमुखं चुम्बतीव ।।

रत्नसिंहस्य

Mallar Inscription of Jājalladeva II; *CII*, IV, pp. 513-15
A.D. 1167

शिवस्तुतिः

(Homage to Śiva)

लक्ष्मीवश्यविधायिनो भवतमःस्तोमच्छिदो दक्षिणाः
सेवानम्रसुरेन्द्रमौलिविलसद्रत्नप्रभाभासुराः ।
लीलानिर्जितपद्मरागरुचयः पापप्रतिद्वन्द्विनः
श्रीकण्ठस्य नखांशवश्चरणयोः श्रेयांसि पुष्णन्तु वः ।।

ऊल्हणदेववीरगतिः

(Ūlhaṇadeva's Death on Battle-field)

कालोऽयं दुरतिक्रमो न सुलभं प्राणप्रयाणं रणे
शूरस्याभिमुखस्थितस्य मनसि श्रेयः परं वाञ्छतः ।

क्षात्रं धर्ममनुज्झतातिरभसा वीरेण तत् प्रस्तुतं
यत्संवीक्ष्य जगाम विस्मयपदं गीर्वाणनारीगणः ।।

त्रैलोक्यविस्मयकरं प्रविलोक्य शौर्यं
रूपं च निर्जितमनोभवमाविभाव्य ।
संग्रामतस्तमनयन् वनिताः सुराणां
स्वं वेश्म तद्गुणसमाहृतलुब्धचित्ताः ।।

राज्ञ्यस्तिस्रोऽनुजग्मुस्तं
भर्तृभक्तिपरायणाः ।
उपभोक्तुमिव स्वर्ग्यान्
भोगान् भर्त्रा समं दिवि ।।

रूपेणास्तमितं प्रयातमसुभिस्त्यागस्य यातं दिशः
शौर्येणाविदिता विवेकवसतिर्दूरे विलासैः स्थितम् ।
प्रव्रज्या जगृहे गुणैर्गुणनिधौ तस्मिन् दिवं प्रस्थिते
ग्रावाणोऽपि रुदन्ति वज्रहृदयं दीर्णं च शोकादभूत् ।।

कुमारपालस्य

Sheorinārāyaṇ Inscription of Jājalladeva II; *CII*, IV, pp. 521, 523-4
A.D. 1167

जिनस्तुतिः

(Homage to Jina)

चिद्रूपं सहजोदितं निरवधि ज्ञानैकनिष्ठार्पितं
नित्योन्मीलितमुल्लसत्परकलं स्यात्कारविस्फारितम् ।
सुव्यक्तं परमाद्भुतं शिवसुखानन्दास्पदं शाश्वतं
नौमि स्तौमि जपामि यामि शरणं तज्ज्योतिरात्मोत्थितम् ।।

सरस्वतीस्तुतिः

(Homage to Sarasvatī)

सारदां सारदां स्तौमि सारदानविसारदाम् ।
भारतीं भारतीं भक्तभुक्तिमुक्तिविशारदाम् ।।

जिनमन्दिरवर्णनम्

(Description of a Jina Temple)

पवनधुतपताकापाणितो भव्यमुख्यान्
पटुपटहनिनादादाह्वयत्येष जैनः ।
कलिकलुषमथोच्चैर्दूरमुत्सारयेद्वा
त्रिभुवनविभुलाभान्नृत्यतीवालयोयम् ।।

गुणभद्रस्य

Bijholi Rock Inscription of Cāhamāna Someśvara; V.S. 1226; *EI*, XXVI, 102, 103, 110

A.D. 1170

आचार्यविमलशिववर्णनम्

(Description of Ācārya Vimalaśiva)

कल्पायुर्विमलशिवः स एष तस्माद्
बिभ्राणः कलियुगकल्पपादपत्वम् ।
यच्छायां विबुधगणोऽधिगम्य धत्ते
वैधुर्यं न खलु महोत्सवोदयेषु ।।

जातिः सज्जनपूजिता रतिपतेर्व्यावर्तनायाकृति-
र्व्यक्तिः कान्तिसुहृत् प्रशान्तिसुतपा स्फीतिर्गुणानां गुरुः ।

रीतिः प्रीतिकरी सतामतितरां नीतिः सदा तद्विदां
मौनं मङ्गलमुद्यमैकसरणेरस्यैव संदृश्यते ।।

वाणी सद्गुणनैपुणप्रणयिनी ब्रह्मास्यपद्माश्रया
श्रीः श्रीवत्सविभूषवत्सवसतिप्रेमेति लोकोक्तयः ।
एतस्मिन् पुनरद्भुतं द्वयमिदं सानन्दमुद्द्योतते
तादृग्यादृगजीजनत् सुमनसां चेतस्सु कौतूहलम् ।।

विद्यासमुद्रचन्द्रस्य
तपःश्रीसरसीरुहः ।
सत्योत्सवाद्रेः सद्वृत्त-
मित्रस्यास्याद्भुतं न किम् ।।

शशिधरस्य

Jabalpur Inscription of Jayasiṁha; *CII*, IV, p. 335
A.D. 1174

शिवस्तुतिः

(Homage to Śiva)

क्रियाद्वः कल्याणं निरवधि विधातुस्त्रिजगतां
समुन्मीलन्नीलोत्पलदलरुचीनां सहचरी ।
रुचिः कण्ठस्योच्चैरचलतनयावक्त्रकमल-
प्रसर्पत्सौरभ्योद्धुरमधुकरीपद्धतिरियम् ।।

चन्द्रोत्पत्तिः

(Origin of the Moon)

जीवातुः कैरवाणाममृतरसवतीसूपकारः सुराणां
ताराणां प्राणनाथः कुसुमशरकथाध्यायिनां पीठमर्दः ।

ादर्शो दिग्वधूनां पृथुगगनसरोराजहंसस्त्रिलोकी-
श्रृङ्गारो रत्नधाम्नः प्रमदरुचिरभूदत्रिनेत्रात् सुधांशुः ।।

तडागवर्णनम्

(Description of a Tank)

चक्राभं कृतममलं
सरसिजरुचिरं सदा जगत्सेव्यम्।
तापापहमुरु हरिमिव
उलुवाग्रामे सरश्चक्रे ।।

कुमारपालस्य

:ription of Ratnadeva III; *CII*, IV, pp. 536, 539

नर्मदास्तुतिः

(Homage to Narmadā)

ोतविमलजलौघैः प्लावयन्ती पवित्रै-
र्मुनिवरपुरलोकात् संस्तुता सिद्धगीर्भिः ।
ानयति सुवंशाज्जातमात्रा कुमारी
कलिजकलुषभारं दर्शनान्नर्मदा या ।।

कीर्तिसिंहवर्णनम्

(Description of Kīrtisiṁha)

सदसि यस्य हिता विविधा बुधाः
सुरपतेरिव मन्त्रविदः सुराः ।

शुशुभिरे शशिनः किरणा गिरः
प्रतिगता जगतस्तमसश्छिदे ।।

सरोवरवर्णनम्

(Description of a Tank)

भुक्तापि यस्मिन् वरपाणिपात्रे
चक्रास्तु नक्तं स्ववधूर्विहाय ।
अम्भो निरीक्ष्याहृतजीवसंघा-
स्तीव्रं तपो वा मुनयश्चरन्ति ।।

तिग्मांशुतापक्लमनोददक्षै-
रुक्षां विचक्रुः स्त्रिय आत्मनोऽङ्के ।
प्राणेशहस्तप्रतिक्लृप्तयन्त्र-
निर्मुक्तधारापयसां कणौघैः ।।

पीत्वालिचक्रैर्मधुमत्तमुग्धैः
पद्माकरालीढमुखैर्नदद्भिः ।
आकर्ण्य मुग्धा अनुजापयन्ति
गीतं यशो यस्य च नागकन्याः ।।

शैवालकल्हारकवारिपर्णी-
सालूकसंघाटक एवमाद्यैः ।
भक्ष्यैरभक्ष्यैर्युतमम्बुबीजै-
र्वप्रैः ससर्जाथ सरो य ईदृक् ।।

क्रीडाप्रवृत्ताः पतिभिः सरोब्धौ
संयम्य चासून् कथमास्थितानाम् ।

तासां भ्रुवोऽङ्गानि कुचोरुजङ्घा
दृष्ट्वाक्षसूत्राण्यपतन्मुनीनाम् ॥

यस्मिंस्तीरे मरकतशिलारत्नबद्धासनस्थै-
र्वीचीलोलारजतशफरीवञ्चितोरुप्रदेशैः ।
विप्रैस्तृप्ता अमरपितरः सप्तदिव्या मनुष्या
आशंसन्ति प्रथितयशसं यं स जीयाद्भुवीति ॥

दिव्याङ्गनाङ्गनवकुङ्कुमपङ्कपिङ्ग-
वारिप्रपूरलवचित्रितरोममालाः ।
क्रीडन्ति यत्र सुखिनो भुवि राजहंसा
अम्भोनिधानमतुलं स सरः ससर्ज ॥

पुरुषोत्तमस्य

Rewa Inscription of Vijayasiṁha; *CII*, IV, pp. 350-3
A.D. 1193

विष्णुस्तुतिः

(Homage to Viṣṇu)

जयति हरिवराहः प्रेमसंभ्रान्तपृथ्वी-
स्तनभरपरिरम्भारम्भदृप्तस्य यस्य ।
पुलकचुलुकिताम्भस्सञ्चयस्तोयराशिः
पुनरविरलनिर्यत्स्वेदपूरैरपूरि ॥

शिवस्तुतिः

(Homage to Śiva)

हेरम्बस्य विकल्पदन्तमुकुलं गौरीरहस्योत्सव-
प्रत्यासन्नविलासदीपकलिका गङ्गामृणालाङ्कुरः ।

देवस्य त्रिपुरद्रुहो विजयिना पुष्पेषुणा मस्तके
विन्यस्ताङ्कुशविभ्रमा विजयते चूडासुधांशोः कला ॥

गणेशस्तुतिः

(Homage to Gaṇeśa)

पायाद्वः परिवर्तमानलहरीप्राग्भारमास्फालयन्
सायंकालतरङ्गकेलिषु करास्कन्देन मन्दाकिनीम् ।
देवस्यारभटीपरिभ्रमकलासंरम्भसंभाविनः
शम्भोरम्बुमृदङ्गवाद्यरचनारम्भाय लम्बोदरः ॥

सरस्वतीस्तुतिः

(Homage to Sarasvatī)

हंसा पद्मासनारूढा यदन्तः समुपासते ।
परामृतरसस्यन्दि स्रोतः सारस्वतं स्तुमः ॥

नृपगणपतिवर्णनम्

(Description of King Gaṇapati)

अथ गणपतिदेवः प्रादुरासीदमुष्मात्
सुरतरुरिव सिन्धोः श्लाघ्यविश्राणनश्रीः ।
विहरति फणिभर्तुः श्वासखेदादपेता
सुरभिमलयजार्द्रे यद्भुजे भूतधात्री ॥

यस्य प्रस्थानभेरीमुखरितहिमवद्गह्वरं सैन्यघोषं
श्रुत्वा प्रत्यर्थिकान्ताः प्रशिथिलकबरीभारबन्धाः समन्तात् ।

झञ्झावातावधूतध्वनितजलधरव्यूहसंक्षोभरिङ्ख-
निर्घाताघातभीतप्रसृमरचमरीविभ्रमा विभ्रमन्ति ।।

. . . .

सुतनु ! वदनकान्तिं वाससः पल्लवेन
स्थगय सलिलपूरैर्दुर्गमं वर्त्म मा भूत् ।
इति गिरिमधिगच्छन् यस्य शत्रुक्षितीशः
कथयति निजकान्तां चन्द्रकान्तस्थलीषु ।।

Cebrolu Inscription of Jāya; after Śaka 1135; *EI*, V, pp. 143-6
A.D. 1213

विष्णुस्तुतिः

(Homage to Viṣṇu)

श्रीभर्तुः कोलमूर्तेः कुलिशसमधिकोदग्रदंष्ट्राग्रजाग्रद्-
गर्वप्रध्वस्तदैत्यप्रकटितवसुधोद्धारवीर्योद्धुरस्य ।
पान्तु त्रैलोक्यमुद्यद्विबुधजयजयध्वानफूत्कारितान्तः-
क्रोधाध्मातस्य गर्जद्घुरुघुरुड्घुरुत्कारवद्घूत्कृतानि ।।

. . . .

प्रत्याशं प्रतिपत्तनं प्रतिपथं प्रत्यापणं प्रत्यगं
प्रत्यर्चि प्रतिकाननं प्रतिपुरं प्रत्यालयं प्रत्यहम् ।
वापीकूपतडागदेवभवनारामप्रपाखण्डिका-
निर्माणैर्न तदस्ति भूमिवलये क्षेत्रं न यन्मुद्रितम् ।।

म्हांइदेवस्य

Tasgaon Plates of Yādava Kṛṣṇa; Śaka 1172; *EI*, XXVII, pp. 211, 215
A.D. 1251

विष्णुस्तुतिः

(Homage to Viṣṇu)

श्वेतः शुभं दिशतु शश्वदसौ वराहः
पातालसद्मनि तमोगहने रहो यः।
औत्सुक्यनुन्नधृतिरुद्वहनोत्सवात् प्राग्
दन्तेन किञ्चिददुनोदधरं धरायाः॥

गणेशस्तुतिः

(Homage to Gaṇeśa)

तत्तेजो नौमि षट्पञ्चचतुरास्यादिभिर्नुतम्।
द्विरदाननमप्युच्चैर्यत्तदद्विरदाननम्॥

चन्द्रकलास्तुतिः

(Homage to the Moon Digit)

किसलयमृदुलाभिः क्रीडनाम्रेडनान्ते
गगनचरवधूभिर्गाढमादाय हर्षात्।
श्रवसि च करमूले शश्वदावेष्ट्य बद्धा
विलसति हिमभानोर्विस्फुरन्ती कला सा॥

सन्ध्यावर्णनम्

(Description of an Evening)

भानुः पश्चिमदिग्वधूमुखसरोजातेनुरागात्मना
काश्मीरेण विशेषकश्रियमिवाधातुं कृताभ्युद्यमः।

रुच्याकारमुपेयुषा मलयजेनायं निशानायकः
पूर्वाशावरवर्णिनीतनुलतां लिम्पन्निवोज्जृम्भते ।।

Akkalapūṇḍi Grant of Śiṅgaya-Nāyaka; Śaka 1290; *EI*, XIII, p. 261-2
A.D. 1368

लक्ष्मीस्तुतिः

(Homage to Lakṣmī)

श्रीः सौभाग्यकरी सदा त्रिजगतां भूयात्कृपारूपिणी
हेरम्बः सचराचरात्मकजगत्संदोहसंदर्भितम् ।
धाता पद्मसमुद्भवोऽपि मनसैवेदं सुवर्णोज्ज्वलं
ब्रह्माण्डं जलमण्डलस्थमसृजद् यस्याः प्रसादोन्नतेः ।।

विष्णुस्तुतिः

(Homage to Viṣṇu)

वाराहाकृतिरच्युतस्त्रिभुवनं पायादपायोज्झितं
दंष्ट्राग्रेण महीं महाजलनिधौ मग्नां समुद्धृत्य यः ।
तत्रैकत्र निधाय पुण्यमतुलं पद्माकरस्थापनात्
तादृक् सम्यगभावतस्तुलयितुं येनाद्भुतं स्वीकृतम् ।।

शिवस्तुतिः

(Homage to Śiva)

सव्यासव्यविलोचने त्रिजगतां वृष्ट्योषधीपोषके
फाले वारिपिता सखा धनपतिः श्रीरत्नगर्भा रथः ।

यस्य श्रीगिरिरालयः स कृपया हेमाचलः कार्मुकः
पायाद्वः शिवतातिराश्रितजनानन्दैकसन्दायकः ।।

माचनस्य

Porumamilla Tank Inscription of Bhāskara Bhavadūra; Śaka 1291; *EI*, XIV, p. 101

A.D. 1369

गणेशस्तुतिः

(Homage to Gaṇeśa)

श्रियमवतु गजास्यः श्रेयसां वो गुणानां
स भुवनजननादौ रम्यहर्म्यं सुराणाम् ।
अजविनुतमहिम्नः कन्दुको यस्य नाभी-
कुहरविहरदम्भः कुम्भिनीशाटिकाभूत् ।।

गोपुरवर्णनम्

(Description of a Temple Gopuram)

श्रीमच्चोडनृपः स पालितमहाषट्कोणभूमीश्वरो
लोकोदञ्चितपञ्चधारनगरीधर्मेश्वरप्रीतये ।
पूर्वद्वारि विराजितं विलसितैरास्थापयद्गोपुरं
द्रष्टुं गोपुरयोषितामिव नवक्रीडाद्रिमिष्टोत्सवान् ।।

यत्रोर्जिताः पणसजम्बिळनाळिकेर-
रम्भारसाळतरवो नृपचोडनाम्ना ।
दातृत्वमस्य परिचेतुमिवावतीर्णाः
कल्पद्रुमाः पुरवने विलसन्ति पञ्च ।।

Pañcadhārala Pillar Inscription of the Koṇa King Coḍa III; Śaka 1325; *EI*, XIX, pp. 158, 161

A.D. 1403

गणेशस्तुतिः

(Homage to Gaṇeśa)

श्रीसंवृद्धि चिरमुरुतरां श्रेयसां स प्रतन्या-
च्चाळुक्यानां कुलदिनरवेर्विश्वनाथस्य राज्ञः।
मात्रादर्शं जनकशिरसश्चन्द्रखण्डेन युञ्जन्
यस्तद्बिम्बं विदधदिव संपूर्णमास्ते गजास्यः॥

कल्याणमण्डपवर्णनम्

(Description of a Kalyāṇamaṇḍapam)

तस्योदञ्चितपञ्चधारनगरीधर्मेश्वरस्योर्जितं
प्रत्यब्दं परिणेतुरीशितुरिदं सञ्जातचेतोभुवः।
कल्याणोत्सवमण्डपं सविभवं प्राकल्पयद्भक्तिमाँ-
श्चालुक्यान्वयविष्णुवर्धनकुलश्रीविश्वभूमीश्वरः॥

पत्याद्रेरिव क्लृप्तमङ्गलचतुःशाले परिभ्राजिते
कल्याणोत्सवमण्डपे विरचिते विश्वेश्वरोर्वीभुजा।
दिव्यामोदिनि राजराजविनुते वृद्धश्रवो विश्रुते
पार्वत्या सह पञ्चधारनगरीधर्मेश्वरो राजते॥

Pañcadhārala Pillar Inscription of the Eastern Cālukya King Viśveśvara; Śaka 1329; *EI*, XIX, pp. 167, 170-1)

A.D. 1407

विष्णुस्तुतिः

(Homage to Viṣṇu)

पातु त्रीणि जगन्ति सन्ततमकूपाराद्धरामुद्धरन्
क्रीडाक्रोडकलेवरः स भगवान् यस्यैकदंष्ट्राङ्कुरे।

कूर्मः क्रन्दति नालति द्विरसनः पत्रन्ति दिग्दन्तिनो
मेरुः कोशति मेदिनी जलजति व्योमापि रोलम्बति ।।

Śrīraṅgam Plates of Harihara-Rāyaṇḍaiyar III: Śaka 1336; *EI*, XVI, p. 224

A.D. 1414

गणेशस्तुतिः

(Homage to Gaṇeśa)

कल्याणायास्तु तद्धाम प्रत्यूहतिमिरापहम् ।
यद्गजोऽप्यगजोद्भूतं हरिणापि च पूज्यते ।।

चन्द्रवर्णनम्

(Description of the Moon)

अस्ति क्षीरमयाद्देवैर्मथ्यमानान्महाम्बुधेः ।
नवनीतमिवोद्भूतमपनीततमो महः ।।

Amarāvatī Inscription of Kṛṣṇarāya of Vijayānagara; Śaka 1437; *EI*, VII, p. 20

A.D. 1515

तिथिनिर्देशः

(Specification of Date)

. . . . गणिते शकवत्सरे ।
प्रमादीशाभिधे वर्षे मासि वैशाखनामनि ।।

पक्षे वलक्षे पुण्यर्क्षे पुण्यायां द्वादशीतिथौ ।
श्रीवेङ्कटेशपादाब्जसन्निधौ श्रेयसान्निधौ ।।

विष्णुस्तुतिः

(Homage to Viṣṇu)

श्रीरामाकुचकस्तूरीचिह्नश्रीवत्सलक्षमणे ।
पूषानुष्णांशुनेत्राय शेषाचलकुटुम्बिने ।।

स्वामिपुष्करिणीतीरधामनित्यविहारिणे ।
इन्दिराया जगन्मातुर्मन्दिरायितवक्षसे ।।

शयनालीनदुग्धाब्धिशैवाललतिकोपमाम् ।
वहते वारिजाक्षाय वक्षसावनमालिकाम् ।।

शङ्खं चक्रं च वहते शयाभ्यामुज्ज्वलं रुचा ।
दृशाविति ज्ञापयते चन्द्राकौं वामदक्षिणे ।।

महनीयतरं रत्नमुकुटं मूर्ध्नि बिभ्रते ।
चक्षुर्भूतेन्दुमार्तण्डज्योतिश्चक्रमिवाश्रितम् ।।

श्रीमद्वेङ्कटनाथाय श्रीनिवासाय विष्णवे ।
श्रीवेङ्कटाचलेन्द्रस्य शिखराभरणायिते ।।

चिदम्बरकवेः

Kandukuru Plates of Veṅkaṭapatideva I; Śaka 1535; *EI*, XIX, pp. 92-3

A.D. 1613

रामस्तुतिः

(Homage to Rāma)

यशोहेतुं सेतुं सुकृतिकृतिसेतुं जलनिधौ
सुबद्धं यश्चक्रे धरणिधरचक्रेण रुचिरम् ।

रुचा कामः कामं जनकतनयावामनयना-
सुविश्रामः कामं कलयतु स रामः कृतजयः ।।

शिवस्तुतिः

(Homage to Śiva)

स्मितज्योत्स्नालेपोज्ज्वलललितकण्ठः कचचय-
शिखिस्फूर्जत्पक्षेक्षणगलितनागो विभसितः ।
मुदे चेलान्दोलांशुगत इति भूषा प्रतिकृते-
र्धृतेगौर्याः शम्भुः स्फटिकरुचिदेहेतिरुचिरः ।।

रणछोडस्य

Rājapraśasti Inscription of Udaipur; *EI*, XXIX, Appendix, pp. 3-4
A.D. 1676